| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १९२६ | २४ | °स्तीम् | °स्वतीम् |
| १९२९ | २० | [12]तत्त्वं | [13]तत्त्वं |
| १९३२ | २० | तंत्र | तत्रं |
| १९३३ | २४ | तदाज्जन् | तदाञ्जन् |
| १९३५ | ६ | देवाज्जन् | देवाञ्जन् |
| १९४३ | २६ | पृतन्यतः | पृतन्यतः |
| १९५७ | २४ | वर्षि° | वर्षि° |
| १९६० | २६ | १,३०८३ | वैप १,३०८३ |
| १९६१ | २८ | युवर्ति | युवति |
| १९६२ | २९ | °वपायतः | °वपायतः |
| १९६६ | २७ | अनुऽपायसि | अनुऽपायसि |
| ,, | २८ | P; वैतु. | वैतु. P, |
| १९६८ | २८ | सयोनी> | सयोनि> |
| १९७० | २३ | परि° | प्ररि° |
| १९८३ | २४ | °मित्ये | °मित्यें |
| | | >मित्ते | >°मित्ते |
| १९९६ | ३० | जंघयो° | जंघयो° |
| १९९९ | २९ | उग्रः | उग्र |
| | | >उग्रः | >उग्रः |
| २००३ | १९ | उप | उप |
| २०१५ | २२ | °कारेणति | कारेणेति |
| २०१६ | १० | इटो° | इति इटो° |
| २०६३ | १ | युध् | युत् |
| २०६५ | ६ | पामा | पाम |
| २०९३ | २० | सं | स |
| २१०५ | १२ | ओकः | ओकः[1] |
| ,, | २८ | [1]प्राहा° | [2]प्राहा° |
| २१०९ | ११ | ऊं | ऊं |
| २१४१ | ६ | असर्यऽः | असूर्यऽः |
| २१५१ | ९ | बाह्वोः | बाह्वोः |
| २१६५ | ४ | °कार | °कार् |
| २१८६ | ९ | ईमा | ईमां |
| २१८८ | २० | इह | इह |
| २२१६ | १२ | °दिन्द्र | °दिन्द्र |
| २२१७ | ३ | इन्द्राणी° | इन्द्राणी° |
| २२१८ | १३ | विश्वा° | विश्वा° |
| २२१९ | १४ | शतुर्दश° | चतुर्दश° |
| २२२३ | ४ | अयभ्या | अयभ्या |
| २२३३ | १ | जरितर° | जरितर° |
| २२३८ | ६ | कुमरिका | कुमारिका |

अभि द्युम्नानि वनिन इन्द्रं सचन्ते अक्षिता । पीत्वी सोमस्य वावृधे ॥७॥

अभि । द्युम्नानि । वनिनः । इन्द्रम् । सचन्ते । अक्षिता । पीत्वी । सोमस्य । ववृधे ॥७॥

[1]वनिनः देवान् संभजमानस्य[1] यजमानस्य द्युम्नानि द्योतमानान्यन्नानि सोमलक्षणानि । 'द्युम्नं द्योततेः । यशो वान्नं वा' ( नि ५,५ ) इति यास्कः । द्युम्नानि विशेष्यन्ते । अक्षिता अक्षितानि अक्षीणानि अतिप्रभूतानि इन्द्रं देवम् अभि सचन्ते अभितः संगच्छन्ते । स च इन्द्रः सोमस्य प्रभूतस्य । अंशम् इति शेषः । अथवा सोमस्य सोमं पीत्वी पीत्वा । पा पाने इत्यस्मात् क्त्वाप्रत्ययस्य 'स्नात्व्यादयश्च' ( पा ७,१,४९ ) इति निपातनात् त्वीभावः । 'घुमास्थागापा' ( पा ६,४,६६ ) इत्यादिना ईत्वम् । प्रत्ययस्वरः । वावृधे प्रवृद्धो भवति ।

अर्वावतो न आ गहि परावतश्च वृत्रहन् । इमा जुषस्व नो गिरः ॥ ८ ॥

अर्वाऽवतः । नः । आ । गहि । पराऽवतः । च । वृत्रऽहन् । इमाः । जुषस्व । नः । गिरः ॥

हे वृत्रहन् वृत्रस्य हन्तरिन्द्र नः अस्मान् यजमानान् अर्वावतः अर्वाचीनाद् अन्तिकाद् देशाद् आ गहि आगच्छ । तथा परावतः दूरदेशाच्च नः आ गहि आगच्छ । 'उपसर्गाच्छन्दसि धात्वर्थे' ( पा ५,१,११८ ) इति वतिप्रत्ययः । प्रत्ययस्वरः । आगत्य च नः अस्माकम् इमा गिरः स्तुतिरूपा वाचो जुषस्व सेवस्व ।

यदन्तरा परावतमर्वावतं च हूयसे । इन्द्रेह तत आ गहि ॥ ९ ॥

यत् । अन्तरा । पराऽवतम् । अर्वाऽवतम् । च । हूयसे । इन्द्र । इह । ततः । आ । गहि ॥

हे इन्द्र परावतम् परावद् दूरस्थानं तथा अर्वावतं च संनिहितस्थानं च यत् यस्मिन् अन्तरा तयोरन्तरालदेशे । उभयत्र 'अन्तरान्तरेणयुक्ते' ( पा २,३,४ ) इति द्वितीया । तत्र हूयसे सम्यग् इज्यसे ततः तस्माद् देशात् परावतः अर्वावतश्च सकाशाद् इह अस्मद्यागदेशं प्रति आ गहि आगच्छ ।

इति षष्ठं सूक्तम् ।

'उद्घेदभि' इति तृचस्य ब्राह्मणाच्छंसिनः प्रातःसवने विनियोग उक्तः ।

उद्घेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥ १ ॥

उत् । घ । इत् । अभि । श्रुतऽमघम् । वृषभम् । नर्यऽअपसम् । अस्तारम् । एषि । सूर्य ॥१॥

हे सूर्य त्वं श्रुतामघम् । मघम् इति धननाम । श्रुतं विख्यातं स्तोतृभ्यो यष्टृभ्यश्च दातव्यं मघं धनं यस्यासौ श्रुतमघः तम् । सत्यपि श्रुतधनत्वे दानाभावे

---

१. नास्ति S'.

प्रयोजनाभावाद् उच्यते वृषभम् इति । अभिमतस्य धनस्य वर्षकम् इत्यर्थः । तथा नर्यापसम् नरेभ्यो हितं नर्यम् अपः कर्म यस्यासौ नर्यापाः तम् । 'तस्मै हितम्' ( पा ५,१,५ ) इति यत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । स्वसेवकानाम् इष्टप्राप्त्यनिष्टपरिहारविषयकर्मवन्तम् इत्यर्थः । तथा अस्तारम् शत्रूणां निरसितारम् । असु क्षेपणे । तृनि छान्दसः इडभावः । एवंमहानुभावम् इन्द्रम् अभि अभिलक्ष्य[1] उद्धेदेषि । घेति प्रसिद्धौ । उदेषि ऊर्ध्वं गच्छसि उदयसि । सूर्योदयाभावे इन्द्रस्य सोमलक्षणहविःप्रदानासंभवाद् उक्तलक्षणम् इन्द्रं प्रति उदेषीत्युच्यते ।

नव॒ यो न॑व॒तिं पुरो॑ बि॒भेद॑ बा॒ह्वो॑जसा । अहिं॑ च वृत्र॒हाऽव॑धीत् ॥ २ ॥

नव॑ । यः । न॒व॒तिम् । पुरः॑ । बि॒भेद॑ । बा॒हुऽओ॑जसा । अहि॑म् । च॒ । वृ॒त्र॒ऽहा । अ॒व॒धी॒त् ॥२ ॥

य इन्द्रः शम्बरस्यासुरस्य नव नवतिं च पुरः नवोत्तरनवतिसंख्याका मायानिर्मिताः पुरीः । 'पङ्क्तिविंशति' ( पा ५,१,५९ ) इत्यादिना [2]तिप्रत्ययान्तो निपातितः । बाह्वोजसा बाहुबलेन अन्यनैरपेक्ष्येणैव बिभेद भिन्नवान् नाशितवान् । तथा च मन्त्रान्तरम्—'दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य' ( ऋ २,१९,६ ) इति । किं च वृत्रहा । वृत्रशब्दः शत्रुसामान्यवचनः । 'वृत्राणि वृत्रहं जहि' ( अ २०,५,३ ), 'इन्द्रो वृत्राणि जिघ्नते' ( अ २०,५,२ ) इत्यादौ तथा दर्शनात् । वृत्राणां शत्रूणां हन्ता इन्द्रः अहिं च । अयति गच्छतीत्यहिर्मेघः । 'अहिरयनात् । एत्यन्तरिक्षे' इति निरुक्तम् ( २,१७ ) । अथवा आगत्य हन्तीत्यहिर्वृत्रः । हन हिंसागत्योः । 'आङि श्रिहनिभ्यां ह्रस्वश्च' ( पाउ ४,१३७ ) इति आङ्पूर्वाद् इण्प्रत्ययः । 'वातेर्डित्' ( पाउ ४,१३३ ) इत्यनुवर्तनात् डिद्भावः आङो ह्रस्वश्च । नित्त्वाद् आद्युदात्तः । तम् अवधीत् हतवान् । स न इत्युत्तरत्र संबन्धः ।

स न॒ इन्द्रः॑ शि॒वः सखाऽश्वा॑वद् गोम॑द् यव॑मत् । उ॒रुधा॑रेव दोहते ॥ ३ ॥

सः । नः॒ । इन्द्रः॑ । शि॒वः । सखा॑ । अश्व॑ऽवत् । गोऽम॑त् । यव॑ऽमत् । उ॒रुधा॑राऽइव । दो॒ह॒ते ॥

सः पूर्वोक्तगुणविशिष्ट इन्द्रः नः अस्माकं शिवः सुखकारी सखा मित्रभूतः । तादृश इन्द्रः अश्वावत् अश्वैर्बहुभिरुपेतं गोमत् बह्वीभिर्गोभिरुपेतं यवमत् । यवो धान्यविशेषः । बहुभिर्यवैर्युक्तं धनम् उरुधारेव प्रभूतधारायुक्ता बहुक्षीरा गौरिव दोहते सा यथा सर्वेषां तर्पणसमर्थं बहु क्षीरं दुग्धे एवं सर्वजनतृप्तिसाधनम् अश्वाद्युपेतं धनं दुग्धाम् प्रयच्छतु । बाहुलकात् शपो लुगभावः । लेटि वा अडागमः ।

इति सप्तमं सूक्तम् ।

---

1. अभिलक्ष्य S'. 2. किप्र° S'.

'इन्द्र क्रतुविदम्' इत्येषा आद्या ऋक् ब्राह्मणाच्छंसिनः शस्त्रयाज्या। उक्तं हि— 'उक्थसंपदः परिधानीयोत्तरा याज्या' ( वैताश्रौ २१,६ ) इति।

'एवा पाहि' इत्याद्यास्तिस्र ऋचस्तेषामेव ब्राह्मणाच्छंस्यादीनां त्रयाणाम् ऋत्विजां क्रमेण माध्यंदिनसवनिक्यः प्रस्थितयाज्याः। तथा च वैतानं सूत्रम्—" 'एवा पाहि' इति प्रस्थितयाज्या" ( वैताश्रौ २१,२१ ) इति।

इन्द्र॑ क्रतु॒विदं॑ सु॒तं सोमं॑ हर्य पुरुष्टुत। पिबा वृ॑षस्व॒ तातृ॑पिम् ॥ ४ ॥

इन्द्र॑। क्र॒तु॒ऽविद॑म्। सु॒तम्। सोम॑म्। ह॒र्य॒। पु॒रु॒ऽस्तु॒त॒। पिब॑। आ। वृ॒ष॒स्व॒। तत॑ृपिम् ॥४॥

[1]हे पुरुष्टुत बहुभिर्बहुप्रकारं वा स्तुत[1] इन्द्र क्रतुविदं क्रतुः प्रज्ञा भवति तस्या लम्भकम्। अथवा क्रतोरेव ज्योतिष्टोमादेर्लम्भकं साधकं सुतम् अभिषुतं[2] ततृपिम् तर्पकं सोमं हर्य कामय। ततृपिम् इत्यत्र 'आदृगमहन°' ( पा ३,२,१७१ ) इति विहितः 'छन्दसि सदादिभ्यो दर्शनात्' ( पावा ३,२,१७१ ) इति किन्। पिब। अपि च आ वृषस्व जठरे सिञ्च। पिबेत्यनेन उक्त एवार्थः पुनरनेन अभिहितः पानस्याधिक्याभिधानाय। व्याख्यातेयम् अस्मिन्नेवानुवाके ( अ २०,६,२ )।

ए॒वा पा॑हि प्र॒त्नथा॒ मन्द॑तु त्वा श्रु॒धि ब्रह्म॑ वावृ॒धस्वो॒त गी॒र्भिः।
आ॒विः सूर्यं॑ कृणु॒हि पी॑पि॒हीषो॑ ज॒हि शत्रूँ॑र॒भि गा इ॑न्द्र तृन्धि ॥ १ ॥

ए॒व। पा॒हि। प्र॒त्नऽथा॑। मन्द॑तु। त्वा॒। श्रु॒धि। ब्रह्म॑। व॒वृ॒धस्व॑। उ॒त। गी॒ःऽभिः।
आ॒विः। सूर्य॑म्। कृ॒णु॒हि। पी॒पि॒हि। इषः॑। ज॒हि। शत्रू॑न्। अ॒भि। गाः। इ॒न्द्र॒। तृ॒न्धि॒ ॥ १ ॥

हे इन्द्र प्रत्नथा। प्रत्नम् इति पुराणनाम। पूर्वं यथा अङ्गिरःप्रभृतीनां सोमयागे सोमम् अपाः। 'प्रत्नपूर्वविश्वेमात् थाल् छन्दसि' ( पा ५,३,१११ ) इति इवार्थे थाल्प्रत्ययः। एव एवम् अस्मदीयमपि सोमं पाहि पिब। स च पीतः सोमः त्वा त्वां मन्दतु मदयतु। तदर्थम् अस्मदीयं ब्रह्म मन्त्रात्मकं स्तोत्रं श्रुधि शृणु। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' ( पा ६,४,१०२ ) इति हेर्धिभावः। न केवलं श्रवणमेव उत अपि च गीर्भिः अस्मदीयाभिः स्तुतिवाग्भिः वावृधस्व वर्धस्व अभिवृद्धो भव। अतस्तव यागार्थं सूर्यम् सर्वकर्मणां प्रेरकं देवम् आविष्कृणुहि प्रकाशितं कुरु। यद्वा अस्माकं व्यवहाराय बहुकालं सूर्यम् आविष्कृणु। तत इषः अन्नानि अस्मदुपभोगसाधनानि पीपिहि प्यायय समर्धय। किं च शत्रून् शातयितॄन् अस्मद्विरोधिनो द्वेष्यान् जहि घातय। हे इन्द्र गाः च पणिभिरपहृता अभि तृन्धि प्रयच्छ। ववृधस्वेति। वृधेर्बहुलग्रहणाच्छपः श्लुः। 'व्यत्ययो बहुलम्' ( पा ३,१,८५ )

---

१. इदं 'ततृपिम्' इत्यतः पूर्वम् पठति S'.　　२. °सुतं त्वा च S'.

इत्यत्र 'क्वचिद् द्विविकरणता च' ( तु. पाका. ) इति वचनात् शप्रत्ययः । विकरणस्वरेण मध्योदात्तः । तृन्धि । उतृदिर् हिंसानादरयोः ।

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥ २ ॥

अर्वाङ् । आ । इहि । सोमऽकामम् । त्वा । आहुः । अयम् । सुतः । तस्य । पिब । मदाय ।
उरुऽव्यचाः । जठरे । आ । वृषस्व । पिताऽइव । नः । शृणुहि । हूयमानः ॥ २ ॥

हे इन्द्र अर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ । किमर्थम् आगमनम् इति चेद् उच्यते — सोमकामं त्वाहुः इति । यतः त्वा त्वां सोमकामम् सोमं कामयमानं सोमविषये अत्यन्ताभिलषितवन्तम् आहुः अभिज्ञाः कथयन्ति । 'सोमकामं हि ते मनः' ( अ २०,११३,२ ) इति हि मन्त्रान्तरम् । 'इमं जम्भसुतं पिब' ( ऋ ८,९१,२ ) इति मन्त्रे जम्भनिष्पीडितस्यापि सोमस्य पानाभिधानाद् इन्द्रस्य सोमे अतिशयप्रीतिसद्भाव उक्तो भवति । यस्मादेवं तस्माद् अयं सोमः सुतः अभिषुतः । तस्य । तं सोमम् इत्यर्थः । 'क्रियाग्रहणं कर्तव्यम्' ( पावा १,४,३२ ) इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । पिब पानं कुरु । कस्मै प्रयोजनायेति उच्यते । मदाय । तस्य पिबेति सोमपानमात्रम् अभिहितम् । इदानीं कुक्षिपरिपूर्तिपर्यन्तं पानम् अभिधीयते — 'उरुव्यचा इत्यादिना'[1] । उरु प्रभूतं व्यचनं कुक्षिबाहुल्यं यस्य स उरुव्यचाः । व्यचेरौणादिकः असिप्रत्ययः । 'व्यचेः कुटादित्वम् अनसीति वक्तव्यम्' ( पावा १,२,१ ) इति वचनात् ङित्त्वाभावेन संप्रसारणाभावः । 'परादिश्छन्दसि बहुलम्' ( पा ६,२,१९९ ) इति उत्तरपदाद्युदात्तत्वम् । तादृशस्त्वं जठरे उदरे अतिविस्तीर्णे आ वृषस्व आसिञ्च सर्वतः पूरय । तदर्थम् आहूयमानः त्वं पितेव यथा पिता पुत्रस्य वचनं शृणोति एवं नः अस्माकम् आह्वानं शृणुहि शृणु । 'उतश्च प्रत्ययाच्छन्दसि वा वचनम्' ( पावा ६,४,१०६ ) इति हेर्लुगभावः ।

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै ।
समु प्रिया आववृत्रन् मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥ ३ ॥

आऽपूर्णः । अस्य । कलशः । स्वाहा । सेक्ताऽइव । कोशम् । सिसिचे । पिबध्यै ।
सम् । ऊं इति । प्रियाः । आ । अववृत्रन् । मदाय । प्रऽदक्षिणित् । अभि । सोमासः । इन्द्रम् ॥

अस्य अस्मै इन्द्राय । चतुर्थ्यर्थे षष्ठी । तदर्थं कलशः द्रोणकलशः आपूर्णः सोमरसेन सर्वतः पूर्ण आसीत् । तच्च पूरणं किमर्थम् इति चेद् उच्यते — स्वाहा स्वाहुतत्वाय । होमार्थम् इत्यर्थः । ततः सेक्तेव कोशम् सेक्ता पूरकः पुमान्

---

१. उरुव्यचेत्यादिना S'.

कोशम् दृतिं यथा सिञ्चति पूरयति उदकादिना एवं पिबध्यै इन्द्रस्य पानाय। पा पाने इत्यस्मात् तुमर्थे शध्यैन्प्रत्ययः। शित्त्वात् पिबादेशः। नित्त्वाद् आद्युदात्तः। सिसिचे सिञ्चति अध्वर्युः सोमरसम्। सामर्थ्याद् ग्रहादिष्विति लभ्यते। ते च सिक्ताः प्रियाः हृद्याः स्वादवः सोमासः सोमाः मदाय इन्द्रस्य हर्षाय प्रदक्षिणित् प्रादक्षिण्येन इन्द्रं सम् अभ्यावव्रत्रन् सम्यग् अभिमुखा वर्तन्ते समभिव्याप्नुवन्ति। वृतु वर्तने। लङि 'बहुलं छन्दसि' (पा २,४,७६) इति श्लुः। व्यत्ययेन परस्मैपदम्। 'बहुलं छन्दसि' (पा ७,१,८) इति झे रुडागमः।

इति अष्टमं सूक्तम्।

'तं वो दस्ममृतीषहम्' इत्यादीनि चत्वारि सूक्तानि माध्यंदिनसवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्तानि। चतुर्थसूक्तस्यान्तिमा 'ऋजीषी वज्री' (अ २०,१२,७) इत्येषा ऋक् शस्त्रयाज्या (द्र. गोब्रा २,४,२)। 'तं वो दस्ममृतीषहम्' (१), 'तत् त्वा यामि सुवीर्यम्' (३) इति प्रगाथौ स्तोत्रियानुरूपौ। 'उदु त्ये मधुमत्तमाः' (अ २०,१०,१) इति सामप्रगाथः[1]। 'इन्द्रः पूर्भित्' (अ २०,११) इति सूक्तम् उक्थमुखम्। 'उदु ब्रह्माणि' (अ २०,१२) इति सूक्तं पर्याससंज्ञम्। 'एवेदिन्द्रम्' (अ २०,१२,६) इति परिधानीया। एतत् सर्वं वैताने सूत्रितम्—"'तं वो दस्ममृतीषहं', 'तत् त्वा यामि सुवीर्यम्' ×××" (वैताश्रौ २२,७;११-१४) इति।

तं वो॑ द॒स्मम॑ृती॒षहं॒ वसो॑र्मन्दा॒नमन्ध॑सः।
अ॒भि व॒त्सं न स्वस॑रेषु धे॒नव॒ इन्द्रं॑ गी॒र्भिर्न॑वामहे॑ ॥ १ ॥

तम्। वः। द॒स्मम्। ऋ॒ति॒ऽसह॑म्। वसोः॑। म॒न्दा॒नम्। अन्ध॑सः।
अ॒भि। व॒त्सम्। न। स्वस॑रेषु। धे॒नवः॑। इन्द्र॑म्। गीः॒ऽभिः। न॒वा॒म॒हे॒ ॥ १ ॥

हे यजमानाः वः युष्मदर्थं युष्मद्यागनिष्पत्त्यर्थं युष्मदभिमतफलार्थं वा तं प्रसिद्धम् इन्द्रम् अभि अभिलक्ष्य गीर्भिः स्तुतिप्रकाशिकाभिर्ऋग्भिः[3] नवामहे स्तुम इति संबन्धः। कीदृशम् इन्द्रम्। दस्मम् दर्शनीयम्। तत्तत्फलार्थिभिरवश्यं सेवनीयम् इत्यर्थः। ऋतीषहम्। अर्तेर्ऋतिशब्दः। आर्तेरभिभवितारं नाशकम्। 'सहेः पृतनर्ताभ्यां च' (पा ८,३,१०९) इत्यत्र 'सहेः' इति योगविभागात् षत्वम्। तथा वसोः वासकस्य अन्धसः अन्नस्य सोमलक्षणस्य। पानेनेति शेषः। मन्दानम् मन्दमानम्। स्तुतौ दृष्टान्तम् आह—वत्सं न स्वसरेषु धेनवः। स्वसरेषु स्वयं सरन्तीति वा स्वः आदित्यः स एनानि सारयतीति वा स्वसराण्यहानि। तेषु आगच्छत्सु निर्गच्छत्सु वा। सायंप्रातःकालेष्वित्यर्थः। तेषु धेनवः प्रभूतेन

१. सामप्रयागः S'. २. °भिर्हवामहे ऋ ८,७६,५. ३. °प्रकाशका° S'.

पयसा प्रीणयित्र्यो गावः अभिनवप्रसवा वा ता वत्सं न। यथा वत्सम् अभिलक्ष्य स्तनप्रदानाय हम्भाशब्दम् उच्चैर्बहुशः कुर्वन्ति तद्वत्।

द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम्।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥ २ ॥

द्युक्षम्। सुऽदानुम्। तविषीभिः। आऽवृतम्। गिरिम्। न। पुरुऽभोजसम्।
क्षुऽमन्तम्। वाजम्। शतिनम्। सहस्रिणम्। मक्षु। गोऽमन्तम्। ईमहे ॥ २ ॥

द्युक्षम् दीप्तं सुदानुम् शोभनदानं विशिष्टदानार्हं तविषीभिः बलैः आवृतम् आच्छन्नम्। बलप्रदम् इत्यर्थः। गिरिं न पुरुभोजसम्। पुरु इति बहुनाम। बहूनां प्रजानां भोगयोग्यं गिरिं न पर्वतमिव। यथा दुर्भिक्षे प्रजा जीवनाय बहुभिः कन्दमूलाद्यन्नैरुपेतं गिरिम् अर्थयन्ते तद्वत्। 'उदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तयः' (नि ६,५) इति हि मन्त्रवर्णः (?)। अयम् वाजम् ईमहे इत्यत्र दृष्टान्तः। तथा क्षुमन्तम्। क्षु शब्दे। शब्दोपेतम्। स्तुतिमन्तम् इत्यर्थः। यो लोके बह्वन्नो भवति स शब्द्यत इति प्रसिद्धम्। शतिनम् शतयुक्तं शतसंख्यानां प्रजानां पोषकत्वेन तद्वन्तम्। एवं सहस्रिणम् इत्येतदपि योज्यम्। अपरिमितप्राणिपोषकम् इत्यर्थः। तथा गोमन्तम् बह्वीभिर्गोभिर्युक्तम्। एवम् उक्तैर्विशेषणैर्विशिष्टं वाजम् अन्नं मक्षु शीघ्रम् ईमहे याचामहे।

तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥ ३ ॥

तत्। त्वा। यामि। सुऽवीर्यम्। तत्। ब्रह्म। पूर्वऽचित्तये।
येन। यतिऽभ्यः। भृगवे। धने। हिते। येन। प्रस्कण्वम्। आविथ ॥ ३ ॥

हे इन्द्र तत् वक्ष्यमाणलक्षणं सुवीर्यम् शोभनवीर्योपेतं ब्रह्म परिवृढम् अन्नं त्वा त्वां यामि याचामि। वर्णलोपश्छान्दसः। "अथापि वर्णलोपो भवति 'तत् त्वा यामि' इति" (नि २,१) इति हि यास्कः। उक्तमेवार्थं पुनराह इतरेभ्यः पूर्वं लाभाय। तत् उक्तलक्षणं ब्रह्म अन्नं पूर्वचित्तये पूर्वप्रज्ञानाय। यामीति संबन्धः। तद् इत्युक्तम्। कीदृक् तद् इत्याह—येन ब्रह्मणा अन्नेन यतिभ्यः कर्मभ्यो निवृत्तेभ्यः सकाशाद् आहृत्य भृगवे एतन्नामकाय महर्षये धने हिते अभिमते सति तं भृगुं प्रीणितवान् असि। यद्वा येन सुवीर्येण अन्नेन यतिभ्यः नियतिमद्भ्यः कर्मसु नियतेभ्यः अन्येभ्यो महर्षिभ्यः तदर्थं धने हिते सति परितोषितवान् असि। तथा भृगवे

एतन्नामकाय महर्षये च । येन च धनेन प्रस्कण्वम् कण्वस्य पुत्रम् एतन्नामानम् ऋषिम् आविथ ररक्षिथ ।

येना॑ समु॒द्रमसृ॑जो म॒हीर॒पस्तदि॑न्द्र॒ वृष्णि॑ ते॒ शवः॑ ।
स॒द्यः सो अ॑स्य महि॒मा न सं॒नशे॒ यं क्षो॒णीर॑नुचक्र॒दे ॥ ४ ॥

येन॑ । स॒मु॒द्रम् । असृ॑जः । म॒हीः । अ॒पः । तत् । इ॒न्द्र॒ । वृष्णि॑ । ते॒ । शवः॑ ।
स॒द्यः । सः । अ॒स्य॒ । म॒हि॒मा । न । सम्ऽन॑शे । यम् । क्षो॒णीः । अ॒नु॒ऽच॒क्र॒दे ॥ ४ ॥

हे इन्द्र येन शवसा बलेन समुद्रम् । समभिद्रवन्त्येनम् आप इति समुद्रः उदधिः । तं प्रति महीः महतीः अतिप्रभूता अपः समुद्रपूर्तिपर्यन्तानि उदकानि असृजः सृष्ट्यादौ सृष्टवान् असि । तत् तादृक् ते शवः बलं वृष्णि वर्षकं सर्वेषाम् अभिमतप्रदात् । भवतीति शेषः । अथ परोक्षम् आह—अस्य इन्द्रस्य स महिमा बहुभिरुदकैः समुद्रपूर्त्यादिलक्षणः सद्यः तदानीमेव न संनशे परैर्न सम्यग् व्याप्तुम् अर्हः । महिम्न आनन्त्याद् अनन्यसाधारणत्वाच्चेति भावः । नशतिर्व्याप्तिकर्मा । कृत्यार्थे केन्प्रत्ययः । यं महिमानं क्षोणीः । क्षोणी पृथिवी । तेन तन्निष्ठः प्राणिनिकरो लक्ष्यते । अनुचक्रदे अनुक्रन्दति । उद्घोषयतीत्यर्थः ।

इति नवमं सूक्तम् ।

'उदु त्ये' इति सूक्तस्य विनियोगः पूर्वसूक्तेन सह उक्तः ।

उदु॒ त्ये मधु॑मत्तमा॒ गिर॒[1] स्तोमा॑स ईरते ।
स॒त्राजि॑तो धन॒सा अक्षि॑तोतयो वा॒जय॑न्तो॒ रथा॑ इव ॥ १ ॥

उत् । ऊं॒ इति॑ । त्ये । मधु॑मत्ऽतमाः । गिरः॑ । स्तोमा॑सः । ई॒र॒ते॒ ।
स॒त्राऽजि॑तः । ध॒न॒ऽसाः । अक्षि॑तऽऊतयः । वा॒ज॒ऽयन्तः॑ । रथाः॑ऽइव ॥ १ ॥

त्ये । तच्छब्दसमानार्थस्त्यच्छब्दः । ते वक्ष्यमाणाः स्तोमासः स्तोमाः त्रिवृदादयः । प्रगीतमन्त्रसाध्यानि स्तोत्राणीत्यर्थः । ते विशेष्यन्ते—मधुमत्तमाः अतिशयेन मधुराः वस्तुवद् वाच्यपि माधुर्यम् अस्त्येव । ते उदीरते प्रादुर्भवन्ति । तथा गिरः । अत्रापि मधुमत्तमा इत्येतत् संबध्यते । अतिशयेन मधुरा गिरः शस्त्राश्रयभूता वाचः अप्रगीतमन्त्रसाध्यान्यपि "शस्त्राणि उदीरते"[2] । ते विशिष्यन्ते—सत्राजितः सहैव एकवारमेव जयन्ति शत्रून् इति सत्राजितः । तथा धनसाः धनानां संभक्तारो धनप्रदाः । 'जनसनखनक्रमगमो विट्' (पा ३,२,६७) इति विट् ।

---

१. गिरः ऋ ८,३,१५. २. शस्त्राण्यपि उदीरिते S.

विड्वनोरनुनासिकस्यात्' ( पा ६,४,४१ ) इति आत्त्वम् । एवम् अक्षितोतयः । क्षितं क्षयः। न विद्यते क्षितं यासां ता अक्षिताः । अक्षिता ऊतयो येषां ते तथोक्ताः। सर्वदा रक्षका इत्यर्थः । 'निष्ठायाम् अण्यदर्थे' ( पा ६,४,६० ) इति पर्युदासाद् दीर्घाभावः। अत एव 'क्षियो दीर्घात्' ( पा ८,२,४६ ) इति निष्ठानत्वाभावः। वाजयन्तः वाजम् अन्नम् इच्छन्तः । क्यचि 'न च्छन्दस्यपुत्रस्य' ( पा ७,४,३५ ) इति ईत्वदीर्घयोः प्रतिषेधः । तत्र दृष्टान्तः — रथा इव । अत्र सत्राजित इत्यादिविशेषणानि दृष्टान्तेऽपि योजयितव्यानि । यथोक्तलक्षणा रथा यथा रथस्वामिनः प्रयोजनाय उदीरते एवम् इन्द्रस्य परितोषाय स्तोमा उदीरत[1] इत्यर्थः ।

कण्वा इव भृगवः सूर्या इव विश्वमिद् धीतमानशुः[2] ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ २ ॥

कण्वाःऽइव । भृगवः । सूर्याःऽइव । विश्वम् । इत् । धीतम् । आनशुः ।
इन्द्रम् । स्तोमेभिः । महयन्तः । आयवः । प्रियऽमेधासः । अस्वरन् ॥ २ ॥

कण्वा इव कण्वगोत्रोत्पन्ना महर्षयोऽपि कण्वाः । ते यथा विश्वम् [3]व्याप्तं लोकत्रयस्वामिनम्[3] । इत्शब्दः अव्यवहितेन इन्द्रम् इत्यनेन संबध्यते । धीतम् ध्यातं तत्तत्फलार्थिभिः सर्वैर्ध्यानोपलक्षितेन स्तोत्रेण विषयीकृतम् इन्द्रमित् इन्द्रमेव आनशुः स्तोत्रशस्त्रादिभिः प्राप्ताः । भृगवः । केवलोऽपि भृगुशब्दः इवेन विशिष्टार्थः परिगृह्यते । भृगव इव । ते यथा उक्तलक्षणम् इन्द्रम् आनशुः । सूर्या इव सूर्या धात्रर्यमादयः । ते यथा स्वनियन्तारम् इन्द्रम् आनशुः । एवम् उक्तगुणकम् इन्द्रं प्रियमेधासः । येषां मेधाः प्रियभूतास्ते प्रियमेधाः । एतन्नामानः आयवः मनुष्या महर्षयः महयन्तः पूजयन्तः स्तोमेभिः स्तोत्रैः अस्वरन् शब्दम् अकुर्वन् । अस्तुवन्नित्यर्थः ।

इति दशमं सूक्तम् ।

'इन्द्रः पूर्भित्' इति सूक्तस्य उक्तो विनियोगः ।

इन्द्रः पूर्भिदातिरद् दासमर्कैर्विदद्वसुर्दयमानो वि शत्रून् ।
ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद् रोदसी उभे ॥ १ ॥

इन्द्रः । पूःऽभित् । आ । अतिरत् । दासम् । अर्कैः । विदत्ऽवसुः । दयमानः । वि । शत्रून् ।
ब्रह्मऽजूतः । तन्वा । ववृधानः । भूरिऽदात्रः । आ । अपृणत् । रोदसी इति । उभे इति ॥ १ ॥

---

1. उदीरित S'. 2. धितमा° मै १,३,३९; 'मौशल कौ २,७१३. 3. व्याप्तलो° S'.

तादृशः सन् वृत्रम् अपावरकं मेघं सर्वतो व्याप्नुवानम् असुरम्। 'तत् को वृत्रः। मेघ इति नैरुक्ताः। त्वाष्ट्रोऽसुर इत्यैतिहासिकाः' (नि २,१६) इति निरुक्तम्। तम् अवृणोत् अरुधत्। तथा स एव इन्द्रः वर्पनीतिः। वर्प इति रूपनाम। अत्र अकारान्तः। तस्य नेता। युद्धे शत्रुं प्रति स्वशरीरप्रापक इत्यर्थः। अनेन तस्य [1]गतम् अयत्नम् उक्तं[1] भवति। तादृशः सन् मायिनाम् मायावताम् असुराणाम्। अत्र सामर्थ्याद् बलानीति गम्यते। यद्वा द्वितीयार्थे षष्ठी। मायिन इत्यर्थः। प्रामिनात् प्रावधीत्। मीञ् हिंसायाम्। 'मीनातेर्निगमे' (पा ७,३,८१) इति ह्रस्वत्वम्। इन्द्रो वृत्रम् अवृणोत् इत्युक्तमेवार्थं विस्पष्टम् आह—उशधक् कामयित्वा शत्रुदाहकः[2]। यद्वा उशतां युद्धं कामयमानानां शत्रूणां दाहक इन्द्रः वनेषु उदकेषु निमित्तभूतेषु वृत्रम् आवरकं मेघं व्यंसम् विगतांसं यथा भवति तथा विदार्य अहन् अवधीत्। ततो राम्याणाम् रमणीयानाम् अपाम् अर्थाय धेनाः। वाङ्नामैतत्। वाचः स्तनितानि आविरकृणोत् प्रकाशम् अकार्षीत्। वृत्रासुरपक्षे वनेषु आच्छन्नं वृत्रम् उशधक् सन् व्यंसम् विगतांसं कृत्वा अंसाद्यङ्गानि विच्छिद्य अहन् अवधीत्। राम्याणाम् रमणार्हाणां क्रीडासाधनानां तद्योषिताम्। रामम् अर्हतीत्यर्थे 'छन्दसि च' (पा ५,१,६७) इति यत्प्रत्ययः[3]। प्रत्ययस्वरेणान्तोदात्तः। आर्तिवाच आविरकृणोद् इत्यर्थः। अथवा राम्याणाम् क्रीडार्हाणां रात्रीणां संबन्धिनीर्धेना गाः। रात्रौ तमसावृताः असुरापहृता गा इत्यर्थः। ताः आविरकृणोत् असुरान् अपहृत्य ताः स्पष्टाश्चकार। असुरैर्देवानां गवादिलक्षणधनम् अपहृत्य रात्रिप्रवेशस्तैत्तिरीयके—'अहर्देवानाम् आसीद् रात्रिरसुराणाम्। तेऽसुरा यद् देवानां वित्तं वेद्यम् आसीत् तेन सह रात्रिं प्राविशन्' (तै १,५,९,२;३) इति।

इन्द्रः स्वर्षा जनयन्नहानि जिगायोशिग्भिः पृतना अभिष्टिः।
प्रारोचयन्मनवे केतुमह्नामविन्दज्ज्योतिर्बृहते रणाय ॥ ४ ॥

इन्द्रः। स्वःऽसाः। जनयन्। अहानि। जिगाय। उशिक्ऽभिः। पृतनाः। अभिष्टिः। प्र। अरोचयत्। मनवे। केतुम्। अह्नाम्। अविन्दत्। ज्योतिः। बृहते। रणाय ॥ ४ ॥

स्वर्षाः स्वर्गस्य लम्भकः। षणु दाने। क्विप्। 'जनसनखनां सञ्झलोः' (पा ६,४,४२) इति आत्वम्। 'सनोतेरनः' (पा ८,३,१०८) इति षत्वम्। 'अहरादीनां पत्यादिषूपसंख्यानम्' (पावा ८,२,७०) इति रत्वम्। अभिष्टिः अभिगन्ता शत्रूणाम् अभिभविता। इषु गतौ। 'मन्त्रे वृषेष' (पा ३,३,९६) इत्यादिना क्तिन उदात्तत्वम्।

---

1. गतमयत्नमुक्तं S'. 2. शत्रुदाहः S'. 3. यप्रत्ययः इति न्याय्यम्.

महः मंहनीयस्य महतो गुणैः प्रवृद्धस्य वा । मह पूजायाम् । क्विप् । 'सावेकाचः' ( पा ६,१,१६८ ) इत्यादिना विभक्तेरुदात्तत्वम् । महच्छब्दस्य वा छान्दसः शतृप्रत्ययलोपः । अस्य प्रसिद्धस्य इन्द्रस्य महानि मंहनीयानि सुकृता सुकृतानि सुष्ठु संपादितानि पुरूणि बहूनि कर्म कर्माणि पनयन्ति स्तुवन्ति स्तोतारः । तेषु एकं कर्म अत्रोपवर्ण्यते । अभिभूत्योजाः अभिभूतिरभिभवः । अभिभवित्र् ओजो बलं यस्य । अथवा शत्र्वभिभवे समर्थम् ओजो यस्य स तथोक्तः । अभिभूतिरभिभवनम् । भावे क्तिन् । 'तादौ च निति°' ( पा ६,२,५० ) इत्यभेः प्रकृतिस्वरत्वम् । अभिभूतिस्थितम् ओजः अस्येति 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च' ( पावा २,२,२४ ) इति समासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । तादृश इन्द्रो वृजनेन आवर्जकेन बलेन आयुधेन वा वृजिनान् पापरूपान् असुरान् सं पिपेष सम्यक् चूर्णीकृतवान् । तथा मायाभिः स्वशक्तिभिः दस्यून् उपक्षपयितॄन् शत्रून् सं पिपेष ।

युधेन्द्रो मह्ना वरिवश्चकार देवेभ्यः सत्पतिश्चर्षणिप्राः ।
विवस्वतः सदने अस्य तानि विप्रा उक्थेभिः कवयो गृणन्ति ॥ ७ ॥

युधा । इन्द्रः । मह्ना । वरिवः । चकार । देवेभ्यः । सत्ऽपतिः । चर्षणिऽप्राः ।
विवस्वतः । सदने । अस्य । तानि । विप्राः । उक्थेभिः । कवयः । गृणन्ति ॥ ७ ॥

इन्द्रो देवः युधा युद्धेन । युध संप्रहारे । भावे संपदादिलक्षणः क्विप् । 'सावेकाचः°' ( पा ६,१,१६८ ) इति विभक्तेरुदात्तता । मह्ना स्वमहत्त्वेन । 'अन्यनैरपेक्ष्येणेत्यर्थः । देवेभ्यः । दीव्यतिरत्र स्तुत्यर्थः । स्तोतृभ्यः तेषामर्थाय वरिवः । धननामैतत् । वरणीयं धनं चकार कृतवान् । वृञ् वरणे इत्यस्य यङ्लुकि रूपम् । 'ऋतश्च' ( पा ७,४,९२ ) इति अभ्यासस्य रिगागमः । तदन्ताद् असुन् । बाहुलकाट्टिलोपः । नित्स्वरः । इन्द्रो विशेष्यते — सत्पतिः सतां कर्मानुष्ठायिनां यजमानानां पालकः चर्षणिप्राः चर्षणयो मनुष्याः तेषाम् अभिमतफलपूरकः । कुत्र वरिवश्चकारेति उच्यते — विवस्वतः । विवस्वान् आदित्यः । तस्य सदने स्थाने वृष्टिप्रतिबन्धकान् असुरान् पराजित्य वृष्टिलक्षणं धनं चकारेत्यर्थः । अथवा एतद् उत्तरत्र संबध्यते । विवस्वतः विशेषेण अग्निहोत्रादिकर्मार्थं वसतो यजमानस्य सदने गृहे । विपूर्वाद् वस निवासे इत्यस्मात् संपदादिलक्षणो भावे क्विप् । तद् अस्यास्तीति मतुप् । 'मादुपधायाः' ( पा ८,२,९ ) इत्यादिना तस्य वत्वम् । प्रत्ययस्य पित्त्वाद् अनुदात्तत्वे धातुस्वर एव । अवग्रहाभावश्छान्दसः । अस्य उक्तमहिमोपेतस्य इन्द्रस्य तानि प्रसिद्धानि वृत्रवधादिलक्षणानि कर्माणि विप्रा मेधाविन ऋत्विजः । कीदृशाः । कवयः क्रान्तप्रज्ञाः अनूचाना वा । 'ये वा अनू-

---

१. °नैरपेक्षेणे° S'.

इन्द्र ओषधीरसनोदहानि वनस्पतीँरसनोदन्तरिक्षम् ।
बिभेद वलं नुनुदे विवाचोऽथाभवद् दमिताभिक्रतूनाम् ॥ १० ॥

इन्द्रः । ओषधीः । असनोत् । अहानि । वनस्पतीन् । असनोत् । अन्तरिक्षम् ।
बिभेद । वलम् । नुनुदे । विऽवाचः । अथ । अभवत् । दमिता । अभिऽक्रतूनाम् ॥ १० ॥

उक्तमहिमोपेतः स एव इन्द्रः ओषधीः व्रीहियवादिका असनोत् प्राण्युपभोगार्थं सृष्ट्वा प्रादात् । तथा अहानि असनोत् दिवसान्यपि प्राण्युपभोगार्थं कल्पयित्वा प्रायच्छत् । एवं वनस्पतीन् तरूंश्चूतपनसाद्यान् असनोत् सृष्ट्वा प्रायच्छत् । एवम् अन्तरिक्षम् अन्तरा क्षान्तं भवति सर्वम् इत्यन्तरिक्षम् आकाशः । तदपि सर्वोपकारार्थम् असनोत् । किंच वलम् एतन्नामानम् असुरं बिभेद अदारयत् । विवाचः विरुद्धा प्रतिकूला वाग् येषां ते विवाचः । तानपि नुनुदे दूरं निराचकार । अथ अनन्तरम् अभिक्रतूनाम् । क्रतवः कर्माणि । अभिगतकर्मणाम् अनुष्ठितविरुद्धकर्मणां दुष्टानां दमिता शमयिता अभवत् अभूत् । अनेन प्राणिनाम् इष्टप्राप्तिम् अनिष्टपरिहारं च कृतवान् इत्युक्तं भवति ।

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥

शुनम् शूनम् अभिवृद्धं सर्वैर्गुणैरुत्कृष्टम् । अथवा शुनम् इति सुखनाम । सुखकरं वा । टुओश्वि गतिवृद्ध्योः । निष्ठायां 'यस्य विभाषा' ( पा ७,२,१५ ) इति इट्प्रतिषेधः । यजादित्वात् संप्रसारणम् । दीर्घाभावश्छान्दसः । 'ओदितश्च' ( पा ८,२,४५ ) इति निष्ठानत्वम् । प्रत्ययस्वरः । मघवानम् । मघम् इति धननाम । धनवन्तम् अस्मिन् एतस्मिन् भरे । भर इति संग्रामनाम भरणात् हरणाच्च[1] । संग्रामे । यद्वा ये ये संग्रामनामानस्ते सर्वे यज्ञनामान इति व्यपदेशाद् अस्मिन् भरे अस्मिन् यज्ञे वाजसातौ । वाजः अन्नम् । तस्य सातिर्लाभः । अन्नलाभे निमित्तभूते । अथवा एतद् भरविशेषणम् । वाजस्य सातिर्यस्मिन् तस्मिन् भरे नृतमम् नेतृतमं संग्रामे पुरतो गन्तारं यज्ञस्य नेतारं वा शृण्वन्तम् आह्वानस्य श्रोतारम् उग्रम् उद्गूर्णबलं समत्सु संग्रामेषु वृत्राणि आवरकान् शत्रून् घ्नन्तम् हिंसन्तं धनानाम् शत्रुसंबन्धिनां संजितम् सम्यग्जेतारम् एवंमहानुभावम् इन्द्रम् ऊतये रक्षणाय हुवेम आह्वयेम ।

इति एकादशं सूक्तम् ।

1. भरणाच्च S',

'उदु ब्रह्माणि' इति सूक्तस्य विनियोग उक्तः ।

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १ ॥

उत् । ऊं इति । ब्रह्माणि । ऐरत । श्रवस्या[1] । इन्द्रम् । सऽमर्ये[1] । महय । वसिष्ठ ।
आ । यः । विश्वानि । शवसा । ततान । उपऽश्रोता । मे । ईवतः । वचांसि ॥ १ ॥

हे ऋत्विजः यूयं श्रवस्या श्रवस्यया । श्रूयते इति श्रवः अन्नम् । तस्येच्छया ब्रह्माणि स्तोत्राणि उदैरत प्रेरयत । हे वसिष्ठ यजमान समर्ये मर्यैर्मर्त्यैर्ऋत्विग्भिः सहिते[2] । यद्वा मर्या मर्यादा । तत्सहिते[2] यज्ञे इन्द्रं देवं महय पूजय । हविरादिभिः साधनैरिति शेषः । एवम् आत्मानमेव परोक्षीकृत्य निर्दिदेश । य इन्द्रः शवसा बलेन विश्वानि भूतजातानि आ ततान वितस्तार । स इन्द्रः ईवतः गच्छतः परिचरतः । ईङ् गतौ । क्विप् । ईर्गमनम् । 'तदस्यास्त्यस्मिन्०' ( पा ५,२,५४ ) इति मतुप् । 'छन्दसीरः' ( पा ८,२,१५ ) इति मतुपो वत्वम् । मतुपः पित्त्वाद् अनुदात्तत्वे धातुस्वरः । तादृशस्य मे वचांसि स्तुतिरूपाणि वाक्यानि उपश्रोता उपेत्य श्रोता । भवत्विति शेषः ।

अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि ।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥ २ ॥

अयामि । घोषः । इन्द्र । देवऽजामिः । इरज्यन्त । यत् । शुरुधः । विऽवाचि । नहि ।
स्वम् । आयुः । चिकिते । जनेषु । तानि । इत् । अंहांसि । अति । पर्षि । अस्मान् ॥

हे इन्द्र देवजामिः देवा जामयो बन्धवो यस्य स तादृशो घोषः शब्दः उक्तलक्षणं स्तोत्रम् अयामि । अकारीत्यर्थः । यम उपरमे । कर्मणि चिण् । यत् यस्मात् कारणाद् विवाचि विगतवचसि नियमस्थे । अथवा विविधा मन्त्ररूपा वाचो यस्य तादृशे यजमाने तस्मिन्निमित्तभूते सति शुरुधः । शुचं रुन्धन्तीति शुरुधः । ककारलोपश्छान्दसः । जनिमृतिलक्षणशोकनिवर्तकाः स्वर्गफलकाः सोमा इरज्यन्त अवर्धन्त[3] । इरज् ईर्ष्यायाम् इति धातुरत्र[4] वृद्ध्यर्थः । अस्मात् कण्ड्वादेर्यक् । सनादित्वाद् धातुसंज्ञायाम् अस्माल्लङ् । 'बहुलं छन्दस्यमाङ्योगेऽपि' ( पा ६,४,७५ ) इति अडभावः । एकादेशस्वरेण मध्योदात्तः । एवं स्तोत्रेण हविषा च इन्द्रं परितोष्य अथ स्वाभिमतं याचते न हि इत्यादिना — जनेषु मनुष्येषु । मनुष्याणाम्

---

1. श्रवस्या P, 2. वैप १,३२८५ f द्र, 3. अवर्धयंत S', 4. धातुरत्र S',

इत्यर्थः। यद्वा जनाः जननात् जन्मानि निमित्तभूतानि। तेषु सत्सु अयं जनो यजमानः स्वम् स्वकीयम् आयुः आयुष्यं न चिकिते न ज्ञातवान्। एतावद् आयुष्यं ममास्तीति न जानातीत्यर्थः। अतस्त्वदीययागाद्यनुष्ठानोपयोगार्थं दीर्घम् आयुः प्रयच्छेति शेषः। क्लृप्तस्य शतसंवत्सरलक्षणस्यायुषोऽल्पीभावे अंहसां कारणत्वात् तदसंस्पर्शं प्रार्थयते— तानीत् तान्यपि आयुःक्षपणहेतुत्वेन प्रसिद्धान्यपि अंहांसि पापानि अस्मान् त्वां संभजमानान् अति अतिक्रम्य पर्षि पालय।

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥ ३ ॥

युजे। रथम्। गोऽएषणम्। हरिऽभ्याम्। उप। ब्रह्माणि। जुजुषाणम्। अस्थुः।
वि। बाधिष्ट। स्यः। रोदसी इति। महिऽत्वा। इन्द्रः। वृत्राणि। अप्रति। जघन्वान्॥

य इन्द्रो गवेषणम् गवां प्रापयितारं रथम्। 'अवङ् स्फोटायनस्य' (पा ६,१,१२३) इति अवङ् आदेशः। हरिभ्याम्। हरी इन्द्रस्यासाधारणावश्वौ। ताभ्यां युजे युयुजे युनक्ति। यागसदनं प्राप्तुम् इति शेषः। ब्रह्माणि अस्मदीयानि प्रवृद्धानि स्तोत्राण्यपि जुजुषाणम् सेवमानं सर्वैः सेव्यमानं वा इन्द्रम् उपास्थुः उपतिष्ठन्ते सेवन्ते। स्यः स इन्द्रः महित्वा स्वमहत्त्वेन रोदसी द्यावापृथिव्यौ वि बाधिष्ट व्यबाधिष्ट। आचक्रामेत्यर्थः। किं च वृत्राणि स्वावरकान् शत्रून् अप्रति न विद्यते प्रतिगतिः पुनःप्राप्तिर्यस्मिन् कर्मणि तद् अप्रति। तद् यथा भवति तथा जघन्वान् नाशितवान्। हन्तेर्लिटः क्वसुः। अभ्यासस्य कुत्वम्। 'विभाषा गमहन°' (पा ७,२,६८) इति इडभावः।

आपश्चित् पिप्यु स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ ४ ॥

आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋतम्। जरितारः। ते। इन्द्र।
याहि। वायुः। न। निऽयुतः। नः। अच्छ। त्वम्। हि। धीभिः। दयसे। वि। वाजान्॥

हे इन्द्र आपश्चित् आपोऽपि सोमाभिषवार्थाः स्तर्यो न गावः स्तर्यो वशा गाव इव पिप्युः अभिवृद्धा आसन्। ओप्यायी वृद्धौ। 'लिड्यङोश्च' (पा ६,१,२९) इति पीभावः। हे इन्द्र ते तव जरितारः स्तोतार ऋत्विजः ऋतम् सत्यफलं यज्ञं नक्षन् प्राप्नुवन्। नक्ष गतौ। यत एवम् अतो नः अस्माकं नियुतः नियोजनानि स्तोत्राणि अच्छ लक्ष्यीकृत्य याहि आगच्छ। तत्र दृष्टान्तः— वायुर्न नियुतः। नियुतो वायोरश्वाः। वायुर्देवो यथा स्वीयान् अश्वान् प्रति याति यज्ञदेशप्राप्त्यर्थम् तद्वत्। त्वं हि त्वं खलु धीभिः कर्मभिस्तुष्टः सन् वाजान्। वाजः अन्नम्। अन्नानि वि दयसे। दयतिरत्र दानार्थः। प्रयच्छसि।

ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्तानस्मिञ्छूर[1] सवने मादयस्व ॥ ५ ॥

ते । त्वा । मदाः । इन्द्र । मादयन्तु । शुष्मिणम् । तुविऽराधसम् । जरित्रे ।
एकः । देवऽत्रा । दयसे । हि । मर्तान् । अस्मिन् । शूर । सवने । मादयस्व ॥ ५ ॥

हे इन्द्र ते अभिषवादिना संस्कृताः प्रसिद्धा मदा मदकराः सोमाः त्वा त्वाम् मादयन्तु मदयुक्तं कुर्वन्तु । कीदृशं त्वाम् । शुष्मिणम् बलवन्तं जरित्रे स्तोत्रे स्तोतुरर्थाय तुविराधसम् प्रभूतधनम् । किं च त्वं देवत्रा देवेषु मध्ये । 'देवमनुष्य' (पा ५,४,५६) इत्यादिना सप्तम्यर्थे त्राप्रत्ययः । एक एव मर्तान् मनुष्यान् दयसे हि दयां करोषि रक्षसि खलु । हिशब्दयोगाद् अनिघातः । मनुष्यरक्षणे त्वम् एक एव नान्यो देव इत्यर्थः । यस्माद् एवं तस्मात् हे शूर शौर्योपेत इन्द्र अस्मिन् सवने यागे माध्यंदिनसवने वा मादयस्व अभिमतप्रदानेन अस्मान् हर्षय स्वात्मानं वा सोमपानेन हर्षय ।

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नः स्तुतो वीरवद् धातु गोमद् यूयं पात स्वस्तिभिः सदा नः ॥६॥

एव । इत् । इन्द्रम् । वृषणम् । वज्रऽबाहुम् । वसिष्ठासः । अभि । अर्चन्ति । अर्कैः ।
सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥

उक्तां स्तुतिम् उपसंहरति — एव एवम् उक्तप्रकारेण वृषणम् वर्षकं कामानां वज्रबाहुम् वज्रं बाहौ यस्य स तादृशम् इन्द्रं वसिष्ठासः वसिष्ठा अर्कैः अर्चनीयैः स्तोत्रैः अभ्यर्चन्ति अभिपूजयन्ति । स इन्द्रः स्तुतः स्तोत्रैः पूजितः सन् नः अस्मभ्यं वीरवत् बहुभिर्वीरैः पुत्रादिभिरुपेतं गोमत् बह्वीभिर्गोभिरुपेतं धनं धातु[3] दधातु प्रयच्छतु । 'बहुलं छन्दसि' (पा २,४,७६) इति श्लोरभावः । हे देवा यूयं च इन्द्रम् अनुसृत्य नः अस्मान् स्वस्तिभिः क्षेमैः सदा पात रक्षत ।

ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा ।
युक्त्वा हरिभ्यामुप यासदर्वाङ् माध्यंदिने सवने मत्सदिन्द्रः ॥ ७ ॥

ऋजीषी । वज्री । वृषभः । तुराषाट् । शुष्मी । राजा । वृत्रऽहा । सोमऽपावा ।
युक्त्वा । हरिऽभ्याम् । उप । यासत् । अर्वाङ् । माध्यंदिने । सवने । मत्सत्[4] । इन्द्रः ॥

ऋजीषी प्रातर्माध्यंदिनसवनाभ्याम् अभिषवेण गतसारस्तृतीयसवन उपयोक्ष्यमाणः सोम ऋजीषः । 'तस्मात् तृतीयसवन ऋजीषम् अभि षुण्वन्ति' (तै ६,१,६,४)

1. °न्नस्मिञ्छूर E,K^m,Dc.  2. वः B^b, ऋ ७,२३,६.  3. दातु S'.  4. मत्सत् P.

इति श्रुतेः । तद्वान् ऋजीषी । अनेन सवनत्रयेऽपि इन्द्रस्य सोमसंबन्ध उक्तो भवति । वज्री वज्रवान् वृषभः कामानां वर्षिता तुराषाट् । तुरास्त्वरमाणाः शत्रवः । तेषाम् अभिभविता शुष्मी शुष्मं शत्रुशोषकं बलं तद्वान् । राजा देवेषु मध्ये क्षत्रियजातीयः सर्वस्य स्वामी वा वृत्रहा वृत्रस्य हन्ता सोमपावा यत्रयत्र सोमाभिषवोऽस्ति तत्रतत्र नियमेन सोमस्य पाता एवंमहानुभाव इन्द्रः हरिभ्याम् अश्वाभ्यां युक्त्वा रथं योजयित्वा अर्वाङ् अस्मदभिमुखाञ्चनः सन् उप यासत् उपगच्छतु गत्वा च अस्मिन् माध्यंदिने सवने मत्सत् अस्माभिर्दत्तेन सोमेन माद्यतु ।

इति द्वादशं सूक्तम् ।

ज्योतिष्टोमादिषु क्रतुषु 'इन्द्रश्च सोमं पिबतं बृहस्पते' इत्याद्यास्तिस्र ऋचस्तेषामेवर्त्विजां त्रयाणां क्रमेण तार्तीयसवनिक्यः प्रस्थितयाज्याः । सूत्रितं हि—“ 'इन्द्रश्च सोमं पिबतं बृहस्पते' इति प्रस्थितयाज्याः” ( वैताश्रौ २२,२१ ) इति ।

'ऐभिरग्ने' ( ४ ) इत्यनया आग्नीध्रः[1] पात्नीवतग्रहं यजेत । सूत्रितं हि—“ 'ऐभिरग्ने' इत्युपांशु पात्नीवतस्य आग्नीध्रो यजति[2]” ( वैताश्रौ २३,३ ) इति ।

इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन् यज्ञे मन्दसाना वृषण्वसू ।
आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥ १ ॥

इन्द्रः । च । सोमम् । पिबतम् । बृहस्पते । अस्मिन् । यज्ञे । मन्दसाना । वृषण्वसू इति वृषण्ऽवसू । आ । वाम् । विशन्तु । इन्दवः । सुऽआभुवः । अस्मे इति । रयिम् । सर्वऽवीरम् । नि । यच्छतम् ॥ १ ॥

हे बृहस्पते बृहतो वेदराशेः स्वामिन् एतन्नामक देव त्वम् इन्द्रश्च युवां सोमं पिबतम् । कीदृशौ युवाम् । अस्मिन् यज्ञे मन्दसाना हृष्यन्तौ वृषण्वसू वर्षितृधनौ । यजमानाय दीयमानधनावित्यर्थः । वाम् युवां स्वाभुवः सुष्ठु सर्वतो भवन्तः । कृत्स्नशरीरव्यापनसमर्था इत्यर्थः । तादृशा इन्दवः सोमाः आ विशन्तु युवयोः शरीरं प्रविशन्तु । अस्मे अस्मभ्यं रयिम् धनं सर्ववीरम् सर्वपुत्राद्युपेतं नि यच्छतम् दत्तम्[3] ।

आ वो वहन्तु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः ।
सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अन्धसः ॥ २ ॥

आ । वः । वहन्तु । सप्तयः । रघुऽस्यदः । रघुऽपत्वानः । प्र । जिगात । बाहुऽभिः । सीदत । आ । बर्हिः । उरु । वः । सदः । कृतम् । मादयध्वम् । मरुतः । मध्वः । अन्धसः ॥

---

१. अग्नीध S'. २. यजते S'. ३. ददतम् S'.

हे मरुतः रघुष्यदः लघुस्यन्दना लघुगतयः सप्तयः सर्पणशीला अश्वाः वः युष्मान् आ वहन्तु यज्ञगृहं प्रति प्रापयन्तु। यूयं च बाहुभिः शीघ्रगमनसाधनैः रघुपत्वानः लघुपतनाः। पत्लृ गतौ। 'अन्येभ्योऽपि दृश्यन्ते' (पा ३,२,७५) इति वनिप्। कृदुत्तरपदप्रकृतिस्वरेण प्रत्ययस्य पित्त्वाद् धातुस्वर एव। तादृशः सन्तः प्र जिगात प्रकर्षेण गच्छत। जिगातीत्ययं गतिकर्मसु पठितः। गा स्तुतौ। जौहोत्यादिकः। लोण्मध्यमबहुवचनस्य 'तप्तन' (पा ७,१,४५) इत्यादिना तबादेशः। तस्य पित्त्वेन ङित्त्वाभावाद् 'ई हल्यघोः' (पा ६,४,११३) इति ईत्वाभावः। वः युष्माकम् उरु विस्तीर्णं सदः सीदन्त्यत्रेति सदः सदनं स्थानं वेदिलक्षणं कृतम् निष्पादितम्। तत्र बर्हिः आस्तीर्णं बर्हिः। आ सीदत बर्हिषि निषण्णा भवत। बर्हिरित्येतत् सद इत्यस्य विशेषणं वा। बर्हिरुपेतं सदनम् इत्यर्थः। अथवा सदः सदनार्हं कृतं बर्हिः सीदतेति योज्यम्। निषद्य च मध्वः मधुरस्य अन्धसः सोमलक्षणस्य अन्नस्य अंशम्। यद्वा मध्वः मधु अन्धसः अन्नं सोमम्। पीत्वेति शेषः। मादयध्वम् तृप्ता भवत। मद तृप्तियोगे। चुरादिः। आत्मनेपदी।

इ॒मं स्तोम॒मर्ह॑ते जा॒तवे॑दसे॒ रथ॑मिव॒ सं म॑हेमा मनी॒षया॑।
भ॒द्रा हि नः॒ प्रम॑तिरस्य सं॒सद्यग्ने॑ स॒ख्ये मा रि॑षामा व॒यं तव॑ ॥ ३ ॥

इ॒मम्। स्तोम॑म्। अर्ह॑ते। जा॒तऽवे॑दसे। रथ॑मऽइव। सम्। म॒हे॒म॒। म॒नी॒षया॑।
भ॒द्रा। हि। नः॒। प्रऽम॑तिः। अ॒स्य॒। स॒म्ऽसदि॑। अग्ने॑। स॒ख्ये। मा। रि॒षा॒म॒। व॒यम्। तव॑ ॥

अर्हते पूज्याय। अर्ह पूजायाम्। 'अर्हः प्रशंसायाम्' (पा ३,२,१३३) इति लटः शत्रादेशः। जातवेदसे जातप्रज्ञाय जातधनाय वा जातानाम् उत्पन्नानां वेदित्रे वा इमम् इदानीं क्रियमाणं स्तोमम् एतत् स्तोत्रं मनीषया निशितया बुद्ध्या सं महेम सम्यक् पूजयेम निष्पादयेम। तत्र दृष्टान्तः—रथमिव यथा रथं रथकारः अक्षफलकाद्यवयवसंयोजनेन संस्करोति तद्वत्। महानुभावस्याग्नेः स्तोमनिष्पादने अतिशयितया बुद्ध्या भवितव्यम् इति प्राप्ते[2] तत्सद्भावं दर्शयति—अस्य पूज्यस्याग्नेः संसदि संसदने उपसत्तौ तद्विषये नः अस्माकं प्रमतिः प्रकृष्टा मतिः भद्रा हि कल्याणी खलु। अतः हे अग्ने तव सख्ये बन्धुभावे सति वयं स्तोतारो मा रिषाम हिंसिता न भवेम।

ऐभि॑रग्ने स॒रथं॑ याह्य॒र्वाङ् ना॑नार॒थं वा॑ वि॒भवो॒ ह्यश्वाः॑।
पत्नी॑वतस्त्रिं॒शतं॒ त्रींश्च॑ दे॒वान॑नुष्व॒धमा व॑ह मा॒दय॑स्व ॥ ४ ॥

आ। ए॒भिः॒। अ॒ग्ने॒। स॒ऽरथ॑म्। या॒हि॒। अ॒र्वाङ्। ना॒ना॒ऽर॒थम्। वा॒। वि॒ऽभवः॑। हि। अश्वाः॑।
पत्नी॑ऽवतः। त्रिं॒शत॑म्। त्रीन्। च॒। दे॒वान्। अ॒नु॒ऽस्व॒धम्। आ। व॒ह॒। मा॒दय॑स्व ॥ ४ ॥

---

१. दृश्यते S'. २. प्राप्तायां S'.

हे अग्ने एभिः वक्ष्यमाणैस्त्रयस्त्रिंशत्संख्याकैर्देवैः सह सरथम् समानः एक एव रथो यस्मिन्नागमनकर्मणि तत् सरथं तद् यथा भवति तथा अर्वाङ् अस्मदभिमुखम् आ याहि आगच्छ । सरथम् इति न नियम इत्याह — नानारथं वा नाना पृथग्भूता रथा यस्मिन्[1] कर्मणि तद् नानारथम् । तत्तत्प्रतिनियतं [2]रथम् आरुह्येत्यर्थः[2] । सरथपक्षे बहूनां देवानाम् एकेनैव रथेन आनयनम् अतिभारत्वात् कथं घटत इति तत्राह — विभवो ह्यश्वा इति । अश्वाः तव रथे नियुक्ता विभवो हि शक्ताः खलु । अतः पत्नीवतः स्वकीयाभिः पत्नीभिर्युक्तान् त्रिंशतम् त्रींश्च त्र्युत्तरत्रिंशत्संख्याकान् देवान् 'ये देवा दिव्येकादश स्थ' ( तै १,४,१०,१ ) इति मन्त्रोक्तान् अनुष्वधम् । स्वधेत्यन्ननाम । तांतां स्वधाम् अनुलक्ष्य यदायदा सोमो हूयते तदा तदेत्यर्थः । आ वह तान् देवान् प्रापय । आवाह्य च मादयस्व सोमप्रदानेन हर्षय ।

इति त्रयोदशं सूक्तम् ।

इति विंशे काण्डे प्रथमोऽनुवाकः ।

द्वितीयेऽनुवाके चत्वारि सूक्तानि । तानि च उक्थ्ये क्रतौ ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्तानि । चतुर्थसूक्तस्यान्तिमा शस्त्रयाज्या । 'उक्थ्ये मैत्रावरुणादिभ्यः' इति प्रक्रम्य सूत्रितं वैताने — " 'वयमु त्वामपूर्व्य' ( अ २०,१४,१ ), 'यो न इदमिदं पुरा' ( अ २०,१४,३ ) इति स्तोत्रियानुरूपौ[3] । स्तोत्रियस्य प्रथमां शस्त्वा तस्या उत्तमं पादं द्वितीयस्याः पूर्वेण संधायावसाय द्वितीयेन द्वितीयां शंसति । तस्याश्चोत्तमम्[4] उत्तरेण संधायावसायोत्तमेन तृतीयाम् । एवं काकुभानां स्तोत्रियानुरूपाणां प्रग्रथनम् । इतः[5] पच्छः शंसति । 'प्र मंहिष्ठाय बृहते बृहद्रये' ( अ २०,१५ ) इत्युक्थमुखम् । 'उदप्रुतो न वयो रक्षमाणाः' ( अ २०,१६ ) इति बार्हस्पत्यं[6] सांशंसिकम् । 'अच्छा म इन्द्रं मतयः स्वर्विदः' ( अ २०,१७ ) इति पर्यासः । इत्यैकाहिकानाम् उत्तमया परिदधाति परया यजति" ( वैताश्रौ २५,१;३-११ ) इति ।

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥१॥

वयम् । ऊं इति । त्वाम् । अपूर्व्य[7] । स्थूरम् । न । कत् । चित् । भरन्तः । अवस्यवः । वाजे । चित्रम् । हवामहे ॥ १ ॥

हे अपूर्व्य । पूर्वम् अर्हतीति पूर्व्यः । न पूर्व्यः अपूर्व्यः । सत्यपि सर्वदा गमने नूतन इत्यर्थः । अनेन तस्य सर्वदा अनादरविषयत्वाभाव उक्तो भवति । तादृश इन्द्र चित्रम् चायनीयं पूजनीयं त्वां भरन्तः हविरादिना पोषयन्तः अवस्यवः रक्षाकामाः । अवतेरसुनि 'क्याच्छन्दसि' ( पा ३,२,१७० ) इति उप्रत्ययः । वाजे । वाजः अन्नम् । अन्ने निमित्तभूते सति । अथवा वाजः संग्रामः । तस्मिन् तन्न-

---

१. बहुव्रीहौ स्वरः ? २. रथमारोहयित्वेत्यर्थः S'. ३. °नुरूपौ हे त्रिस्रः करोति पुनरादायं S'. ४. तस्या एवोत्त° RG. ५. मिथः S'. ६. बार्हस्पत्ये S'. ७. अपूर्व्य P[2].

यार्थं वयमु वयमेव हवामहे आह्वयामः । अस्मान् प्रत्येव त्वम् आगच्छ नास्मत्प्रतिपक्षान् इत्यमुम् अर्थं द्योतयितुम् उशब्दः । तत्र दृष्टान्तः — स्थूरं न कच्चित् । यथा लोके कच्चित् कदाचित् स्थूरम् स्थूलं गुणाढ्यं राजादिकं भरन्तः तदभिमतप्रदानेन पोषयन्तो जनाः स्वजयार्थम् आह्वयन्ति तद्वत् ।

उप॑ त्वा॒ कर्म॑न्नू॒तये॒ स नो॒ युवो॒ग्रश्च॑क्राम॒ यो धृ॒षत् ।
त्वामिद्ध्य॑वि॒तारं॑ ववृ॒महे॒ सखा॑य इन्द्र सान॒सिम् ॥ २ ॥

उप॑ । त्वा॒ । कर्म॑न् । ऊ॒तये॑ । सः । नः॒ । युवा॑ । उ॒ग्रः । च॒क्राम॑ । यः । धृ॒षत् ।
त्वाम् । इत् । हि । अ॒वि॒तार॑म् । व॒वृ॒महे॑ । सखा॑यः । इन्द्र॒ । सा॒न॒सिम् ॥ २ ॥

हे इन्द्र त्वा त्वां कर्मन् कर्मणि युद्धादिलक्षणे प्रस्तुते सति ऊतये रक्षायै[1] उप । गच्छाम इति शेषः । य इन्द्रो धृषत् शत्रूणां धर्षको भवति । युवा नित्यतरुणः उग्रः उद्गूर्णबलः । स इन्द्रो नः अस्मान् चक्राम क्रामति । सहायत्वेन गच्छत्वित्यर्थः । हे इन्द्र सानसिम् संभक्तारम् अवितारम् रक्षितारं त्वामिद्धि त्वामेव हि सखायः तव मित्रभूता वयं ववृमहे वृणीमहे संभजामहे ।

यो न॑ इ॒दमि॑दं पु॒रा प्र वस्य॑ आनि॒नाय॒ तमु॑ वः[2] स्तुषे । सखा॑य॒ इन्द्र॑मू॒तये॑ ॥३॥

यः । नः॒ । इ॒दम्ऽइ॑दम् । पु॒रा । प्र । वस्यः॑ । आ॒ऽनि॒नाय॑ । तम् । ऊं॒ इति॑ । वः॒ । स्तु॒षे॒ ।
सखा॑यः । इन्द्र॑म् । ऊ॒तये॑ ॥ ३ ॥

हे सखायः समानख्याना मित्रभूता यजमानाः वः युष्माकम् ऊतये रक्षार्थं तम् इन्द्रं स्तुषे स्तौमि । यः इन्द्रः पुरा पूर्वं नः अस्माकं वस्यः वसीयः । [3]ईकारलोपश्छान्दसः । अतिप्रशस्तं वसु हिरण्यादिकम् इदमिदम्[4] इदं गवादिकम् इति निर्दिश्यनिर्दिश्य प्रानिनाय[5] प्रानैषीत् । तमु तमेव अभिमतप्रदातारम् इन्द्रम् । स्तुषे इति संबन्धः ।

हर्य॑श्वं॒ सत्प॑तिं चर्ष॒णीस॒हं स हि ष्मा॒ यो अम॑न्दत ।
आ तु नः॒ स व॑यति॒ गव्य॒मश्व्यं॑ स्तो॒तृभ्यो॑ म॒घवा॑ श॒तम् ॥ ४ ॥

हरि॑ऽअश्वम् । सत्ऽप॑तिम् । च॒र्ष॒णि॒ऽसह॑म् । सः । हि । स्म॒ । यः । अम॑न्दत ।
आ । तु । नः॒ । सः । व॒य॒ति॒ । गव्य॑म् । अश्व्य॑म् । स्तो॒तृऽभ्यः॑ । म॒घऽवा॑ । श॒तम् ॥४॥

हर्यश्वम् । हरिनामकावश्वौ यस्य स हर्यश्वः । तं सत्पतिम् सतां कर्मश्रेष्ठानां पालकं चर्षणीसहम् चर्षणयो मनुष्याः तेषाम् अभिभवितारम् । नियन्तारम् इत्यर्थः ।

---

१. रक्षाय S'. २. वः B^h,C,D, ऋ ८,२१,९. ३. इकार° S'.
४. इदम् S'. ५. प्रा नास्ति S'.

तम् इन्द्रं स्तुषे इति संबन्धः । य इन्द्रः अमन्दत स्तुत्या तृप्तो भवति स हि स्म स हि खलु । स्तुत्य इति शेषः । अतः उक्तगुणविशिष्टत्वात् तमेवेन्द्रं स्तुषे इत्यर्थः । यद्वा यः अमन्दत यो नरः इन्द्रदत्तेन धनेन तृप्त आसीत् स हि स्म स एव नरः उक्तलक्षणम् इन्द्रं तुष्टूषति । स मघवा धनवान् इन्द्रः । तुशब्दो वाक्यच्छेदे । स्तोतृभ्यो नः अस्मभ्यं शतम् शतसंख्याकं गव्यम् गोसमूहम् अश्व्यम् शतसंख्याकम् अश्वसमूहं च आ वयति प्रापयतु । वी गत्यादिषु । अस्माल्लेटि अडागमः ।

इति द्वितीयेऽनुवाके प्रथमं सूक्तम् ।

'प्र मंहिष्ठाय बृहते बृहद्रये' इति सूक्तस्य उक्थ्ये क्रतौ ब्राह्मणाच्छंसिशस्त्रे विनियोग उक्तः ।

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥ १ ॥

प्र । मंहिष्ठाय । बृहते । बृहत्ऽरये । सत्यऽशुष्माय । तवसे । मतिम् । भरे ।
अपाम्ऽइव । प्रवणे । यस्य । दुःऽधरम् । राधः । विश्वऽआयु । शवसे । अपऽवृतम् ॥१॥

मंहिष्ठाय अतिशयेन मंहनीयाय दातृतमाय वा बृहते महते गुणैः प्रवृद्धाय बृहद्रये । रयिरिति धननाम । प्रभूतधनाय सत्यशुष्माय सत्यबलाय अवितथसामर्थ्याय । तवसे । तवो बलम् । अतिशयितबलाय इन्द्राय । अथ वा तवसे बललाभाय उक्तगुणकाय इन्द्राय मतिं प्र भरे स्तोत्रं संपादयामि । यस्य उक्तगुणविशिष्टेन्द्रस्य विश्वायु । आयवो मनुष्याः । विश्वेषां मनुष्याणां पोषणसमर्थं राधः धनम् अपामिव प्रवणे । प्रवणः अवनतो देशः । तस्मिन् अपां पूर इव स यथा दुर्धरो भवति एवं दुर्धरं धनं शवसे बलाय प्रयोजनाय अपावृतम् अपगतावरणं कृतम् । तस्मा इन्द्राय मतिं भरे इति संबन्धः ।

अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत् पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥ २ ॥

अध । ते । विश्वम् । अनु । ह । असत् । इष्टये । आपः । निम्नाऽइव । सवना । हविष्मतः ।
यत् । पर्वते । न । सम्ऽअशीत । हर्यतः । इन्द्रस्य । वज्रः । श्नथिता । हिरण्ययः ॥ २ ॥

अध अथ हे इन्द्र ते तव इष्टये एषणाय यागाय वा विश्वम् सर्वं जगत् अनु हासत् । हेति प्रसिद्धौ । अनुकूलं भवेत् । तत्र दृष्टान्तः—आपो निम्नेव निम्नानि स्थलानि आप इव । ता यथा अनुक्रमेण प्रवहन्ति तद्वद् विश्वम् अनु

हासद् इति संबन्धः । अथवा उत्तरत्र दृष्टान्तः — आपो निम्नानीव हविष्मतः यजमानस्य सवना सवनानि त्रीण्यपि त्वाम् अनुगच्छन्ति । यत् यस्मात् हर्यतः कान्तः कमनीयः श्नथिता शत्रूणां हिंसको हिरण्ययः हिरण्यमयो हिरण्येन भूषितः इन्द्रस्य वज्रः पर्वते पर्वतेऽपि न समशीन न सक्तोऽभूत् किं तु व्यदारयदेव । अतो विश्वम् अनु हासद् इति पूर्वत्र संबन्धः ।

अस्मै भीमाय नमसा सम॑ध्वर उषो न शुभ्र आ भ॑रा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥ ३ ॥

अस्मै । भीमाय । नमसा । सम् । अध्वरे । उषः । न । शुभ्रे । आ । भर । पनीयसे ।
यस्य । धाम । श्रवसे । नाम । इन्द्रियम् । ज्योतिः । अकारि । हरितः । न । अयसे ॥ ३ ॥

हे शुभ्रे दीप्ते हे उषः उषोदेवते भीमाय । बिभेत्यस्माद् इति भीमः । शत्रूणां भयंकराय पनीयसे अतिशयेन स्तोतव्याय अस्मै इन्द्राय । यागः क्रियत इति शेषः । अतो नमसा न । नमः अन्नं च । नशब्दः चार्थे । चकाराद् उक्तलक्षणम् इन्द्रं च अध्वरे समा भर सम्यग् आहर अस्मद्यज्ञं प्रापय । अस्मदभिमतम् अन्नं यष्टव्यम् इन्द्रं च आनयेत्यर्थः । 'उषस्युदितायां सत्यामेव'[1] इन्द्रस्यागमनाद् उषस इन्द्राहरणव्यपदेशः । अथवा नशब्दः अनर्थकः । उक्तलक्षणाय इन्द्राय नमसा । नमः अन्नम् । आ भर । अन्ने समृद्धे सत्येव इन्द्रम् उद्दिश्य यागप्रवृत्तेरेवम् उक्तम् । यस्य इन्द्रस्य धाम सर्वेषां धारकं पोषकम् इन्द्रियम् इन्द्रहितम्[2] इन्द्रदत्तं वा । 'इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्ट' (पा ५,२,९३) इत्यादिना इन्द्रियशब्दो निपातितः । 'उक्तलक्षणं नाम[3] सर्वेषां [4]नामकम् उदकं श्रवसे[4] अन्नाय तत्समृद्धये भवति । येन च इन्द्रेण हरितो न हरितामिव दिशामिव अयसे प्राणिनां गमनाय गमनादिव्यवहाराय । अय पय गतौ इत्यस्माद् असुन् । ज्योतिः अकारि क्रियते । तं समा भरेति पूर्वत्र संबन्धः ।

इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत् क्षोणीरिव प्रति नो हर्य तद् वचः ॥४॥

इमे । ते । इन्द्र । ते । वयम् । पुरुऽस्तुत । ये । त्वा । आऽरभ्य । चरामसि । प्रभुवसो इति प्रभुऽवसो । नहि । त्वत् । अन्यः । गिर्वणः । गिरः । सघत् । क्षोणीःऽइव । प्रति । नः । हर्य । तत् । वचः ॥ ४ ॥

हे इन्द्र ते इमे । प्रसिद्धिवाचकस्तच्छब्दः । इदम्शब्दः अपरोक्षवाची । त्वदर्थकत्वेन प्रसिद्धा वयं ते तव स्वभूताः । हे पुरुष्टुत बहुभिर्बहुप्रकारं वा स्तुत ।

---

१. उषस्युदिते सत्येव S'. २. इन्द्रियमहितम् S'. ३. °लक्षनाम S'.
४. °कमुदश्रवसे S'.

एतद् इन्द्रेत्यस्य विशेषणम् । त इत्युक्तं कीदृशास्त इत्यत्राह — ये वयम् हे प्रभूवसो प्रभूतधन इन्द्र त्वा त्वाम् आरभ्य आश्रित्य त्वामेव शरणं प्राप्य चरामसि चरामः । ते वयम् इति पूर्वत्र संबन्धः । हे गिर्वणः गीर्भिर्वननीय इन्द्र त्वदन्यः त्वत्तो व्यतिरिक्तो देवः गिरः अस्मदीयानि वचांसि नहि सघत् न खलु सहते । स्तुत्यस्य तव महिम्नो निरवधित्वाद् अस्मदीयानां स्तुतिवचसाम् अत्यल्पत्वाच्च तादृग्वचस्त्वयैव सोढव्यम् इत्यर्थः । सहेर्लेटि अडागमः । वर्णविपर्ययेण हकारस्य घकारः । तत्र दृष्टान्तः — क्षोणीरिव क्षोणय इव । क्षोणीशब्देनात्र प्रजा विवक्ष्यन्ते । प्रजा राज्ञो यद्यद् विज्ञापयन्ति तत् सर्वं स राजा यथा सहते तद्वद् इत्यर्थः । यस्माद् एवं तस्माद् नः अस्माकं तद् वचः तादृग्वचनं प्रति हर्य प्रतिकामय ।

भूरिं त इन्द्र वीर्यं१[1] तवं स्मस्यस्य स्तोतुर्मघवन् काममा पृंण ।
अनुं ते द्यौर्बृहती वीर्यं मम इयं चं ते पृथिवी नेम ओजसे ॥ ५ ॥

भूरिं । ते । इन्द्र । वीर्यम् । तवं । स्मसि । अस्य । स्तोतुः । मघऽवन् । कामम् । आ । पृण । अनुं । ते । द्यौः । बृहती । वीर्यम् । ममे । इयम् । च । ते । पृथिवी । नेमे । ओजसे ॥

हे इन्द्र ते तव वीर्यम् वीरकर्म वृत्रवधादिलक्षणं भूरि अतिबहु यतः अतो वयं तव स्मसि स्मः तव विधेया भवामः । 'श्नसोरल्लोपः' ( पा ६,४,१११ ) इति अकारलोपः । 'इदन्तो मसि' ( पा ७,१,४६ ) । [2]अस्य स्तोतुः[2] स्तवं कुर्वतोऽस्य यजमानस्य कामम् अभिलषितम् हे मघवन् धनवन् इन्द्र आ पृण आपूरय । पृण प्रीणने । तौदादिकः । अत्र पूरणार्थः । 'अतो हेः' ( पा ६,४,१०५ ) इति हेर्लुक् । भूरि त इन्द्र वीर्यम् इत्युक्तं वीर्यबहुत्वमेव स्पष्टयति — ते तव वीर्यं बृहती महती द्यौः महान् द्युलोकः अनु ममे अनुक्रमेण माति परिच्छिनत्ति । इन्द्रसृष्टस्य वृष्ट्युदकादेरास्पदत्वेन द्यौरेव ममे । अन्यः कश्चित् परिच्छेत्ता नास्तीत्यर्थः । माङ् माने । लिडादि सर्वम् । न केवलं द्यौरेव इयं पृथिवी च ते ओजसे तव ओजसा बलेन निमित्तेन नेमे ननाम नम्रा भवति । त्वदोजःसंभूतेन गिरितरुगुल्मप्राण्यादिधारणेनेत्यभिप्रायः । अतः पृथिवी च वीर्यं ममे इति भावः ।

त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन् पर्वशश्चकर्तिथ ।
अवासृजो निर्वृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥ ६ ॥

त्वम् । तम् । इन्द्र । पर्वतम् । महाम् । उरुम्[3] । वज्रेण । वज्रिन् । पर्वऽशः । चकर्तिथ । अवं । असृजः । निःऽवृताः[4] । सर्तवै । अपः । सत्रा । विश्वम् । दधिषे । केवलम् । सहः ॥६॥

---

१. वीर्यं३ B,Bh,D,R,Cs. २. अस्तोतुः S'. ३. ऊरुम् P,P². ४. निऽर्वृताः P,Cp.

हे इन्द्र वज्रिन् वज्रवन् त्वं तं प्रसिद्धं महाम् महान्तं महत्त्वोपेतम्। नकारतकारयोर्लोपश्छान्दसः। उरुम् अतिप्रभूतं पर्वतम् पर्ववन्तं गिरिम्। जातावेकवचनम्। गिरीन् वज्रेण आयुधेन पर्वशः अवयवशः पक्षादिक्रमेण चकर्तिथ शकलीकृतवान् असि। कृती छेदने। थलि क्रादिनियमाद् इट्। गुणः। यद्वा अत्र पर्वतशब्दः 'उत्तरत्र वृष्ट्यभिधानाद्'[1] मेघवाची। उक्तलक्षणं मेघं वज्रेण पर्वशो विदारितवान् असीत्यर्थः। अनन्तरं निवृताः नितरां मेघेन वृताः अपः सर्ववै नद्याद्यात्मना सरणाय अवासृजः अवाङ्मुखं विसृष्टवान् असि। एवमाद्यात्मकं केवलम् असाधारणं विश्वम् सर्वं सहः बलं त्वं दधिषे धारयसि। एतत् सत्रा सत्यं न मृषा। सत्रेति सत्यनाम।

इति द्वितीयेऽनुवाके द्वितीयं सूक्तम्।

'उदप्रुतः' इति सूक्तस्य उक्थ्ये क्रतौ ब्राह्मणाच्छंसिशस्त्रे विनियोग उक्तः।

उ॒द॒प्रुतो॒ न वयो॒ रक्ष॑माणा॒ वाव॑दतो अ॒भ्रिय॑स्येव॒[2] घोषा॑ः।
गि॒रि॒भ्रजो॒[3] नो॒र्मयो॒ मद॑न्तो॒ बृह॒स्पति॑म॒भ्य॑१र्का[4] अ॑नावन् ॥ १ ॥

उ॒द॒ऽप्रुत॑ः। न। वय॑ः। रक्ष॑माणाः। वाव॑दतः। अ॒भ्रिय॑स्यऽइव। घोषा॑ः।
गि॒रि॒ऽभ्रज॑ः। न। ऊ॒र्मय॑ः। मद॑न्तः। बृ॒ह॒स्पति॑म्। अ॒भि। अ॒र्काः। अ॒ना॒व॒न् ॥ १ ॥

उदप्रुतः उदकेषु गच्छन्तश्चरन्तः। छान्दसत्वाद् असंज्ञायामपि उदकशब्दस्य उदादेशः। रक्षमाणाः आत्मानं व्याधादिभ्यः पालयन्तो वयो न पक्षिण इव ते यथा उच्चैर्ध्वनन्ति। वावदतः भृशं शब्दं कुर्वतः। वदेर्यङ्लुकि शतरि रूपम्। 'अभ्यस्तानाम् आदिः' (पा ६,१,१८९) इति आद्युदात्तः। अभ्रस्य[5] मेघसमूहस्य घोषाः शब्दा इव। तथा गिरिभ्रजः। गिरिरिति मेघनाम। मेघेभ्यः सकाशाद् गच्छन्तः अधः पतन्तः मदन्तः सस्यादींस्तर्पयन्तः। अनेन धाराध्वनिरुपलक्ष्यते ऊर्मयो न ऊर्मयः[6] उदकानि ते यथा अधःपतनसमये शब्दं कुर्वन्ति एवम् अर्काः अर्चनसाधना मन्त्राः। 'अर्को मन्त्रो भवति। यदनेनार्चन्ति' इति निरुक्तम् (५,४)। अथ वा अर्काः अर्चकाः स्तोतारो बृहस्पतिम् बृहतो मन्त्रराशेः स्वामिनम् एतन्नामानं देवम् अभ्यनावन् अभिस्तुवन्ति। नौतेश्छान्दसे लङि व्यत्ययेन शप्।

सं गोभि॑राङ्गि॒रसो॒ नक्ष॑माणो॒ भग॑ इ॒वेद॑र्य॒मणं॑ निनाय।
जने॑ मि॒त्रो न दम्प॑ती अनक्ति॒ बृह॑स्पते वा॒जया॒शूँरि॑वा॒जौ ॥ २ ॥

---

१. उत्तरत्राप्युवृष्ट्यभिधानादत्र S'. २. अभ्यस्येव S, सा. ३. गि॒रि॒भ्राजो B
४. °भ्य॑१र्का B,C,E. ५. वैद्य. मंपा. ६. ऊर्मयो रसाः S'.

सम् । गोभिः । आङ्गिरसः । नक्षमाणः । भगःऽइव । इत् । अर्यमणम् । निनाय । जने । मित्रः । न । दम्पती इति दम्ऽपती । अनक्ति । बृहस्पते । वाजय । आशून्ऽइव । आजौ ॥

आङ्गिरसः [1]अङ्गिरोगोत्रोत्पन्नः एतन्नामा[1] महर्षिः गोभिः । विकारे प्रकृतिशब्दः । गोविकारैराज्यैः । यद्वा गोभिः स्तुतिवाग्भिः नक्षमाणः व्याप्नुवन् भग इवेत् एतन्नामको देव इव स यथा वधूवरौ अर्यमणं देवं नयति विवाहसमये एवम् अर्यमणम् विवाहहोमाभिमानिनम् एतन्नामानं देवं दम्पती सं निनाय नयतु । किं च जने प्राणिसमूहे मित्रो न मित्राख्यो देव इव स यथा स्वरश्मीन् अनक्ति प्रकाशाय एवं स एव महर्षिः दम्पती वधूवरौ अनक्ति योजयति । हे बृहस्पते देव त्वं च आशून् आजाविव यथा संग्रामे योद्धारः आशून् व्यापकान् अश्वान्[2] योजयन्ति एवं वधूवरौ वाजय संयोजय ।

साध्वर्या अतिथिनीरिषिरा स्पार्हाः सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे[3] यवमिव स्थिविभ्यः ॥ ३ ॥

साधुऽअर्याः । अतिथिनीः । इषिराः । स्पार्हाः । सुऽवर्णाः । अनवद्यऽरूपाः । बृहस्पतिः । पर्वतेभ्यः । विऽतूर्य । निः । गाः । ऊपे । यवम्ऽइव[4] । स्थिविऽभ्यः ॥३॥

साध्वर्याः साध्वभिगन्तव्या अतिथिनीः अतिथितर्पका अतनशीला वा इषिराः एषणीयाः स्पार्हाः सर्वैः स्पृहणीयाः सुवर्णाः शोभनशुक्लादिवर्णोपेता अनवद्यरूपाः अनिन्दितरूपाः प्रशस्तरूपाः । 'अवद्यपण्य' ( पा ३,१,१०१ ) इत्यादिना गर्ह्यार्थे अवद्यशब्दो निपातितः । पूर्वपदप्रकृतिस्वरः । एवंलक्षणा गाः बृहस्पतिः देवः पर्वतेभ्यः वलसंबन्धिभिरसुरैः पिहितेभ्यः पर्वतेभ्यः सकाशाद् वितूर्य निर्गमय्य[5] निरूपे निर्वपति निष्कृष्य प्रयच्छति स्तोतृभ्यः । तत्र दृष्टान्तः— यवमिव स्थिविभ्यः । स्थिवयः स्थिरा यवकाण्डाः । तेभ्यः सकाशाद् यथा यवं निष्कृष्य वपति तद्वत् । यद्वा स्थिवयः कुसूलाः । तेभ्यः सकाशाद् यवमिव ।

आप्रुषायन् मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः ।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव[6] वि त्वचं बिभेद ॥ ४ ॥

आऽप्रुषायन् । मधुना । ऋतस्य । योनिम् । अवऽक्षिपन् । अर्कः । उल्काम्ऽइव । द्योः[7] । बृहस्पतिः । उद्धरन् । अश्मनः । गाः । भूम्याः । उद्नाऽइव । वि । त्वचम् । बिभेद ॥४॥

बृहस्पतिर्देवः मधुना । मधु इति उदकनाम । उदकेन आप्रुषायन् भूमिं सर्वतः सिञ्चन् । प्रुष प्लुष स्नेहनसेचनपूरणेषु । व्यत्ययेन विकरणस्य शायजादेशः ।

---

१. °गोत्रोत्पन्नो यस्य नामा S'. २. अश्वानिव तान् यथा S'. ३. ऊपे B.
४. वर्यम्ऽइव P. ५. निर्गमयित्वा S'. ६. उद्नेव RW. ७. द्यौः P.

चित्स्वरः । ऋतस्य योनिम् उदकस्य कारणभूतं मेघम् । यद्वा ऋतस्य योनिरित्युदकनाम । मेघम् उदकं वा । मधुन ऋतस्येत्यत्र संहितायाम् 'ऋत्यकः' (पा ६,१,१२८) इत्यत्र ह्रस्व इत्यनुवर्तनाद् ह्रस्वत्वम् । द्योः द्युलोकसकाशाद् अवक्षिपन् अवाङ्मुखं प्रेरयन् । तत्र दृष्टान्तः—अर्कः आदित्यः द्योः सकाशाद् उल्कामिव तां यथा अवक्षिपति तद्वत् । किं च स बृहस्पतिः अश्मनः मेघसकाशाद् गा उदकानि उद्धरन् च्यावयन् । अथवा अश्मनः पणिभिः पिहितात् पर्वतात् तदुद्धारेण गाः तैरपहृत्य स्थापिता उद्धरन् अपगमयन् उद्नेव उदकेनेव तेन यथा भूम्यास्त्वचं विभिनत्ति उच्छूनां करोति एवं भूम्यास्त्वचं गोखुराग्रैः वि बिभेद विदारितवान् । सर्वत्र गाः समचारयद् इत्यर्थः ।

अप ज्योतिषा तमो अन्तरिक्षादुद्नः[1] शीपालमिव वात आजत् ।
बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ॥ ५ ॥

अप । ज्योतिषा । तमः । अन्तरिक्षात् । उद्नः । शीपालम्ऽइव । वातः । आजत् ।
बृहस्पतिः । अनुऽमृश्य । वलस्य । अभ्रम्ऽइव । वातः । आ । चक्रे । आ । गाः ॥ ५ ॥

बृहस्पतिर्देवः ज्योतिषा दीप्त्या प्रकाशेन अन्तरिक्षात् आकाशाद् गिरिकुहरात् तमः अन्धकारं गवाम् आवरकम् उद्[2] आजत् उद्गमयत् । तत्र दृष्टान्तः—वातः वायुः उद्नः उदकात् । 'पद्दन्' (पा ६,१,६३) इत्यादिना उदकशब्दस्य उदन्नादेशः । 'अल्लोपोऽनः' (पा ६,४,१३४) इति अकारलोपः । उदात्तनिवृत्तिस्वरः । तत्सकाशात् शीपालमिव शीपालं शैवालम् । वर्णव्यत्ययेन ऐकारवकारयोरीकारपकारौ । तद् यथा उदजति अपगमयति तद्वत् । किं च बृहस्पतिः देवो वलस्य एतन्नामकस्यासुरस्य गवाम् अवस्थानप्रदेशम् अनुमृश्य परामृश्य वातः वायुः अभ्रमिव स यथा मेघम् आकरोति सर्वतः प्रसारयति अन्तरिक्ष एवं गाः बलेन अपहृत्य *[आ] आच्छन्नाः आ चक्रे सर्वतो व्याप्ता अकरोत् ।

यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः ।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम्[3] ॥ ६ ॥

यदा । वलस्य । पीयतः । जसुम् । भेत् । बृहस्पतिः । अग्नितपःऽभिः । अर्कैः ।
दत्ऽभिः । न । जिह्वा । परिऽविष्टम् । आदत्[4] । आविः । निऽधीन् । अकृणोत् । उस्रियाणाम् ॥

बृहस्पतिः देवो यदा यस्मिन् काले वलस्य एतन्नामकस्यासुरस्य पीयतः । हिंसाकर्मैतत् । हिंसकस्य तस्य जसुम् हिंसासाधनम् आयुधं भेत् अभेद् अभिनत् ।

---

१. °वुद्भः RW.   २. वैतु. मंपा.   ३. °र्निधीँरकृ° RW.   ४. स्वरार्थ चादिलोपोऽनुमेयः, आ ✓ दा वा द्र.

ष्कृष्य हरति तद्वत् । विरवेण विविधशब्देन हम्भालक्षणेन लिङ्गेन ज्ञात्वा विकृत्य वलाख्यम् असुरं गोरूपधारिणं छित्वा निर्जभार बिलान्निर्जहार ।

सोषामविन्दत् स स्वः१ सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥ ९ ॥

सः । उषाम् । अविन्दत् । सः । स्वः१रिति स्वः[1] । सः । अग्निम् । सः । अर्केण । वि । बबाधे । तमांसि । बृहस्पतिः । गोऽवपुषः । वलस्य । निः । मज्जानम् । न । पर्वणः । जभार ॥ ९ ॥

सः पूर्वोक्तो बृहस्पतिः पर्वतकुहरे अन्धकारावस्थितानां गवां दर्शनाय उषाम् उषसम् । छान्दसः सकारलोपः । अविन्दत् अलभत । स एव बृहस्पतिः स्वः । स्वरादित्यः । आदित्यं च प्रकाशाय अविन्दत् । एवम् सः अग्निं च अविन्दत् । लब्ध्वा च अर्केण तेजसा तमांसि वि बबाधे विशेषेण बाधितवान् । तदनन्तरं बृहस्पतिः गोवपुषः वृषभरूपधारिणो वलस्य असुरस्य हननेन मज्जानं न पर्वणः अस्थ्नः संबन्धिनं मज्जानं षष्ठं धातुं पर्वणः अस्थिपर्वसकाशाद् यथा बलाद् निर्हन्ति तद्वद् गा निर्जभार निष्कृष्य आहृतवान् ।

हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद् वलो गाः ।
अनानुकृत्यमपुनश्चकार यात् सूर्यामासा मिथ उच्चरातः ॥ १० ॥

हिमाऽइव । पर्णा । मुषिता । वनानि । बृहस्पतिना । अकृपयत् । वलः । गाः । अननुऽकृत्यम् । अपुनरिति । चकार । यात् । सूर्यामासा । मिथः । उत्ऽचरातः ॥ १० ॥

बृहस्पतिना देवेन हिमेव पर्णा हिमानि पर्णानीव । यथा हिमानि पर्णानि निःसाराणि कृत्वा मुष्णन्ति एवं वनानि वननीयानि धनानि गोलक्षणानि मुषिता मुषितानि आसन् । स च वलः अपि गाः मुषिता अकृपयत् । प्रायच्छद् इत्यर्थः । किं च स बृहस्पतिः तादृक् कर्म अननुकृत्यम् अन्यैरननुकरणीयम् अन्येन कर्तुम् अशक्यं तथा अपुनः न विद्यते पुनस्तत् कर्म यस्मिन् तद् अपुनः पुनःकरणरहितं च चकार कृतवान् । अन्यकर्तव्यरहितं स्वेनापि पुनः कर्तव्यरहितं चाकरोद् इत्यर्थः । किं तत् कर्मेति उच्यते—यात् । यद् इत्यर्थः । छान्दसो दीर्घः । सूर्यामासा । मस्यते परिमीयते स्वकलावृद्धिहानिभ्याम् इति माश्चन्द्रमाः । मातीति वा माश्चन्द्रः । सूर्याचन्द्रमसौ । 'देवताद्वन्द्वे च' (पा ६,३,२६) इति आनङ् । 'देवताद्वन्द्वे च' (पा ६,२,१४१) इति उभयपदप्रकृतिस्वरत्वम् । 'सुपां सुलुक्' (पा ७,१,३९) इत्यादिना विभक्तेराकारः । तौ मिथः परस्परम् अहोरात्रयोः उच्चरातः उच्चरतः ऊर्ध्वं गच्छत इति यत् तच्चकार ।

---

१. स्वऽरिति स्वः P; स्व१रिति स्वः Cp.

अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन् बृहस्पतिर्भिनदद्रिं विदद् गाः ॥११॥

अभि । श्यावम् । न । कृशनेभिः । अश्वम् । नक्षत्रेभिः । पितरः । द्याम् । अपिंशन् ।
रात्र्याम् । तमः । अदधुः । ज्योतिः । अहन् । बृहस्पतिः । भिनत् । अद्रिम् । विदत् । गाः ॥

बृहस्पतिः देवः यदा अद्रिम् गवाम् आच्छादकं गिरिं भिनत् अभिनद् विदारितवान् विदार्य च यदा [1]गाः च विदत्[1] । विद्लृ लाभे । लुङि लृदित्त्वाद् अङ् । तदा पितरः पालका देवा इन्द्राद्याः श्यावं न अश्वम् कपिशवर्णम् अश्वमिव तं यथा लोके कृशनेभिः । कृशनम् इति सुवर्णनाम । कृशनैः सुवर्णमयैराभरणैः पिंशन्ति अलंकुर्वन्ति एवं नक्षत्रेभिः । नक्षात् नाशात् त्रायन्ते इति नक्षत्राणि न विद्यते क्षत्रं बलम् एषाम् इति वा नक्षत्राणि ग्रहतारकादीनि । तैः द्याम् द्युलोकम् अपिंशन् अलंचक्रुः । पिश अवयवे । तुदादिः । एवं रात्र्याम् निशि तमः अन्धकारम् अदधुः स्थापितवन्तः । एवम् अहन् अहनि ज्योतिः सर्वस्य दीपकं तेजः आदित्याख्यम् अदधुः ।

इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति ।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात् ॥१२॥

इदम् । अकर्म । नमः । अभ्रियाय । यः । पूर्वीः । अनु । आऽनोनवीति । बृहस्पतिः ।
सः । हि । गोभिः । सः । अश्वैः । सः । वीरेभिः । सः । नृऽभिः । नः । वयः । धात् ॥

अभ्रियाय अभ्रम् अर्हतीति अभ्रियः । 'समुद्राभ्राद् घः' (पा ४,४,११८) इति घप्रत्ययः । मेघविदारणेन जलं प्रयच्छते बृहस्पतये इदं नमः नमस्कारोपलक्षितम् अन्नम् अन्नसाधनं वा स्तोत्रम् अकर्म वयम् अकार्ष्म । करोतेर्लुङि 'मन्त्रे घस' (पा २,४,८०) इत्यादिना च्लेर्लुकि कृते 'छन्दस्युभयथा' (पा ३,४,११७) इति तिङ आर्धधातुकत्वाद्[2] ङिद्वद्भावाभावे गुणः । यो बृहस्पतिः पूर्वीः बह्वीर्ऋचः अनु अनुक्रमेण आनोनवीति अत्यर्थम् आभिमुख्येन ब्रवीति साधु स्तुतवान् इति ब्रूते स हि स खलु बृहस्पतिः नः गोभिः बह्वीभिः सहितं वयः अन्नम् अधात्[3] प्रयच्छत्विति संबन्धः । एवम् उत्तरत्रापि योज्यम् । स एव बृहस्पतिः अश्वैः बहुभिः सहितं वयोऽधात् । स बृहस्पतिः वीरेभिः वीरैः पुत्रैरुपेतं वयोऽधात् । स च बृहस्पतिः नृभिः नेतृभिर्भृत्यादिभिः सहितं वयोऽधात् ।

इति द्वितीयेऽनुवाके तृतीयं सूक्तम् ।

'अच्छा म इन्द्रम्' इति सूक्तमपि तत्रैव उक्थ्ये ब्रह्मशस्त्रे विनियुक्तम् । तत्र 'बृहस्पतिर्नः परि पातु' (११) इत्येषा परिधानीया । 'बृहस्पते युवमिन्द्रश्च' (१२) इत्येषा शस्त्रयाज्या ।

---

१. गाश्चाविदत् S'. २. सार्वधातु° S'. ३. वैतु. मंपा.

**अच्छा॑ म॒ इन्द्रं॑ म॒तयः॑ स्व॒र्विदः॑ स॒ध्रीची॒र्विश्वा॑ उश॒तीर॑नूषत ।**
**परि॑ ष्वजन्ते॒ जन॑यो॒ यथा॒ पतिं॒ मर्यं॒ न शु॒न्ध्युं॑[1] म॒घवा॑नमू॒तये॑ ॥ १ ॥**

अच्छ॑ । मे॒ । इन्द्र॑म् । म॒तयः॑ । स्वः॒ऽविदः॑ । स॒ध्रीचीः॑ । विश्वाः॑ । उ॒श॒तीः । अ॒नू॒षत॒ ।
परि॑ । स्व॒ज॒न्ते॒ । जन॑यः । यथा॑ । पति॑म् । मर्य॑म् । न । शु॒न्ध्युम् । म॒घऽवा॑नम् । ऊ॒तये॑ ॥

इन्द्रं **देवम्** अच्छ **अभिमुखीकृत्य** मे **मम सुहस्त्यस्य घौषेयस्य** मतयः **स्तुतयः** अनूषत **स्तुवन्ति । नू स्तुतौ । च्लेः सिच् । कुटादित्वेन** ( पा १,२,१ ) **सिचः ङिद्वद्भावाद् गुणाभावः । इडभावश्छान्दसः । मतयो विशेष्यन्ते**—स्वर्विदः **स्वर्गस्य सुखस्य वा लम्भयित्र्यः** सध्रीचीः **सहाञ्चनाः परस्परं संगताः । अञ्चु गतिपूजनयोः । 'ऋत्विग्दधृक्स्रग्'** ( पा ३,२,५९ ) **इत्यादिना किन् । नकारलोपः । सहस्य सध्र्यादेशः ।** 'अञ्चतेश्चोपसंख्यानम्' ( पावा ४,१,६ ) **इति ङीप् । भसंज्ञायाम्** 'अचः' ( पा ६,४,१३८ ) **इत्यकारलोपः ।** विश्वाः **व्याप्ता** उशतीः **इन्द्रं कामयमानाः । आदरातिशयद्योतनाय उक्तमेवार्थं सदृष्टान्तं पुनराह**— परि ष्वजन्ते **इति ।** जनयः **जनयन्ति उत्पादयन्ति अपत्यम् इति जनयो योषितः । ता** यथा पतिं परि ष्वजन्ते **दृढम् आलिङ्गन्ति । किं च** शुन्ध्युम् **शोधकं** मर्यं न **मर्त्यमिव यथा पित्रादिकं दूराद् आगतं पुत्रादयो बन्धुजना** ऊतये **स्वरक्षणाय परिष्वजन्ते तद्वद्** मघवानम् **मघवन्तं धनवन्तम् इन्द्रम् ऊतये रक्षणाय मे मतयः परि ष्वजन्ते । निर्धनस्य रक्षाकरणायोगाद् मघवन्तम् इत्युक्तम् ।**

**न घा॑ त्व॒द्रिगप॑ वेति मे॒ मन॒स्त्वे इत् कामं॑ पुरुहूत शिश्रय ।**
**राजे॑व दस्म॒ नि ष॒दोऽधि॑ ब॒र्हिष्य॒स्मिन्त्सु[2][3] सोमे॑ऽव॒पान॑मस्तु[4] ते ॥ २ ॥**

न । घ॒ । त्व॒द्रिक् । अप॑ । वे॒ति॒ । मे॒ । मनः॑ । त्वे इति॑ । इत् । काम॑म् । पु॒रु॒ऽहू॒त॒ । शि॒श्र॒य॒ ।
राजा॑ऽइव । द॒स्म॒ । नि । स॒दः॒ । अधि॑ । ब॒र्हिषि॑ । अ॒स्मिन् । सु । सोमे॑ । अ॒व॒ऽपान॑म् ।
अ॒स्तु॒ । ते॒ ॥ २ ॥

हे पुरुहूत **बहुभिराहूत इन्द्र** त्वद्रिक् **त्वां गच्छत्** मे **मम** मनः न घ **न खलु** अप वेति **अपगच्छति कदाचिदपि त्वत्तो नापसरति किं तु** त्वे इत् **त्वय्येव** कामम् **अभिलाषं** शिश्रय **श्रयति आश्रयति । श्रिञ् सेवायाम् । छान्दसे लिटि 'णलुत्तमो वा'** ( पा ७,१,९१ ) **इति वृद्ध्यभावे रूपम् । यस्माद् एवं तस्मात् हे** दस्म **शत्रूणाम् उपक्षपयितः दर्शनीय वा इन्द्र त्वं** राजेव **यथा राजा सिंहासने निषीदति एवम्** अधि बर्हिषि । **अधिः सप्तम्यर्थानुवादी । आस्तीर्णे दर्भे** नि षदः

---

१. शुन्ध्यं S. २. शुन्ध्यं S'. ३. °स्मिन्सु B,Cs. ४. सोमे अवपानं° B.

निषीद । तत्र[1] को लाभ इति उच्यते — अस्मिन् सोमे सोमयागे संस्कृते वा सोमे ते तव अवपानम् अवनतं पानम् अस्तु भवतु ।

विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥ ३ ॥

विषुऽवृत् । इन्द्रः । अमतेः । उत । क्षुधः । सः । इत् । रायः । मघऽवा । वस्वः । ईशते ।
तस्य । इत् । इमे । प्रवणे । सप्त । सिन्धवः । वयः । वर्धन्ति । वृषभस्य । शुष्मिणः ॥

इन्द्रो देवः अस्माकम् अमतेः दारिद्र्यस्य शून्याया मतेर्वा विषूवृत् विष्वग् वर्तयिता प्रच्यावयिता[2] भवतु । विषुशब्दोपपदाद् वर्ततेः क्विप् । उत अपि च इन्द्रः क्षुधः बुभुक्षाया विषूवृद् भवतु । सत्स्वन्येषु देवेषु इन्द्र एव कथं प्रार्थ्यत इति तत्राह — स इत् स एव मघवा धनवान् इन्द्रः रायः दानार्हस्य वस्वः वसुनो वासकस्य धनस्य ईशते ईष्टे स्वामी भवति । 'तिङां तिङो भवन्ति' (पावा ७,१,३९) इत्येकवचनस्थाने बहुवचनम् । किं च वृषभस्य वर्षकस्य शुष्मिणः बलवतः तस्येत् तस्यैवेन्द्रस्य संबन्धिनः इमे प्रसिद्धाः सप्त सिन्धवः स्यन्दनशीलाः 'इमं मे गङ्गे' (ऋ १०,७५,५) इतिमन्त्रोक्ता गङ्गाद्याः सप्त सिन्धवः प्रवणे अवनते देशे वयो वर्धन्ति अन्नं समर्धयन्ति । वृधु वृद्धौ । णिच् । 'छन्दस्युभयथा' (पा ३,४,११७) इत्यार्धधातुकसंज्ञायां णिलोपः ।

वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः ।
प्रैषामनीकं शवसा दविद्युतद् विदत् स्व१र्मनवे[3] ज्योतिरार्यम् ॥ ४ ॥

वयः । न । वृक्षम् । सुऽपलाशम् । आ । असदन् । सोमासः । इन्द्रम् । मन्दिनः ।
चमूऽसदः । प्र । एषाम् । अनीकम् । शवसा । दविद्युतत् । विदत् । स्वः । मनवे ।
ज्योतिः । आर्यम् ॥ ४ ॥

वयो न वृक्षम् यथा वयः पक्षिणः सुपलाशम् शोभनपर्णोपेतं पल्लवितं वृक्षम्[4] आसीदन्ति तद्वद् मन्दिनः मदकराः चमूषदः चम्वोरधिषवणफलकयोरवस्थिताः सोमासः सोमा इन्द्रम् आसदन् । एषां सोमानाम् अनीकम् समूहो मुखं वा शवसा दविद्युतत् द्योतते । 'दाधर्तिदर्धर्ति' (पा ७,४,६५) इत्यादिना यङ्लुगन्ताद् द्युतेः शतरि अभ्यासस्य संप्रसारणाभावः अभ्यासस्य अत्वं विगागमश्च निपात्यते । 'अभ्यस्तानामादिः' (पा ६,१,१८९) इत्याद्युदात्तः । किं च तद् अनीकं स्वः आदित्याख्यम् आर्यम् अर्यम् अरणीयम् अभिगमनीयं ज्योतिः मनवे मनुष्याय मनुष्याणां प्रकाशाय विदत् अविदत् । प्रायच्छद् इत्यर्थः ।

---

1. तेत्र S'; निषीदतेऽत्र शंपा. 2. प्राच्याव° S'. 3. स्व३र्मं° B,R. 4. नास्ति S'.

( पा ३,२,१७० ) इति उप्रत्ययः । 'अश्वाघस्यात्' ( पा ७,४,३७ ) इति आत्वम् । प्रत्ययस्वरः । तस्माद् नः अस्मान् परि पातु सर्वतो रक्षतु । उत अपि च उत्तरस्माद् अधरात् च देशाद् आगच्छतः अघायोः नः अस्मान् परि पातु । एवम् इन्द्रः अपि देवः पुरस्ताद् आगच्छतः अघायोः परि पातु । मध्यतः मध्यमाद् देशादप्यागच्छतः परि पातु । एवं सर्वतो रक्षां कृत्वा सखा मित्रभूत इन्द्रः सखिभ्यः सखिभूतेभ्यः अस्मभ्यं वरिवः । धननामैतत् । धनं कृणोतु करोतु प्रयच्छतु । हविःप्रदानवरप्रदानाभ्यां परस्परं सखिभावो द्रष्टव्यः ।

बृह॑स्पते यु॒वमिन्द्र॑श्च॒ वस्वो॑ दि॒व्यस्ये॑शाथे उ॒त पार्थि॑वस्य ।
ध॒त्तं र॒यिं स्तु॑व॒ते की॒रये॑ चिद्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ १२ ॥

बृह॑स्पते । यु॒वम् । इन्द्रः॑ । च॒ । वस्वः॑ । दि॒व्यस्य॑ । ई॒शा॒थे॒ इति॑ । उ॒त । पार्थि॑वस्य ।
ध॒त्तम् । र॒यिम् । स्तु॒व॒ते । की॒रये॑ । चि॒त् । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । न॒ः ॥ १२ ॥

हे बृहस्पते त्वं च इन्द्रश्च युवम् युवाम् । 'प्रथमायाश्च द्विवचने भाषायाम्' ( पा ७,२,८८ ) इति विहितम् आत्वं छन्दसि न भवति । दिव्यस्य दिवि भवस्य वस्वः वसुनः ईशाथे स्वामिनौ भवथः । उत अपिच पार्थिवस्य पृथिवीसंबन्धिनो वस्व ईशाथे । यस्माद् एवं तस्मात् स्तुवते स्तोत्रं कुर्वते कीरये स्तोत्रे मह्यम् । चिद् इति पूरणः । रयिम् धनं धत्तम् प्रयच्छतम् । गतम् अन्यत् (अ २०,१२,६) ।

इति द्वितीयेऽनुवाके चतुर्थं सूक्तम् ।

इति विंशे[1] काण्डे द्वितीयोऽनुवाकः ।

तृतीयेऽनुवाके त्रयोदश सूक्तानि । तत्र आद्यानि चत्वारि सूक्तानि अतिरात्रे क्रतौ प्रथमपर्याये ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्तानि । चतुर्थसूक्तस्य अन्तिमा 'य उदृचीन्द्र' इत्येषा परिधानीया । 'अतिरात्रेऽहोरात्रादिभ्यः' इति प्रक्रम्य सूत्रितं वैताने— "'वयमु त्वा तदिदर्थाः' ( १ ), 'वयमिन्द्र त्वायवः' ( ४ ) इति स्तोत्रियानुरूपौ । ऊर्ध्वं सर्वत्र त्रीणि [2]सूक्तानि । अन्त्यं[2] पच्छः पर्यासः । 'य उदृचि' ( अ २०,२१,११ ) इति परिधानीया । 'अप्सु धूतस्य' ( अ २०,३३,१ ) इति याज्या" ( वैताश्रौ २६,१;५-७ ) इति ।

स्तोत्रियानुरूपाणां शंसनप्रकारस्तत्रैव उक्तः—'स्तोत्रियानुरूपयोः [3]प्रथमे पर्याये[3] प्रथमानि पदानि [4]पुनरादायम् अर्धर्चशस्यवच्छंसति[4] । मध्यमे पर्याये मध्यमानि । उत्तम उत्तमानि' ( वैताश्रौ २६,३ ) इति ।

व॒यमु॑ त्वा त॒दिद॑र्था॒ इन्द्र॑ त्वा॒यन्तः॒ सखा॑यः । कण्वा॑ उ॒क्थेभि॑र्जरन्ते ॥ १ ॥

---

१. विंशति° S'. २. सूक्तानि अंतं S'. ३. नास्ति RG. ४. पुनरादाय अर्धर्चशः शंसति S'.

वयम् । ऊं इति । त्वा । तदित्ऽअर्थाः । इन्द्र । त्वाऽयन्तः । सखायः । कण्वाः । उक्थेभिः । जरन्ते ॥ १ ॥

हे इन्द्र तदिदर्थाः तदित् तदेव स्तोत्रम् अर्थः प्रयोजनं येषां ते तदिदर्थाः त्वायन्तः त्वाम् आत्मन इच्छन्तो वयं सखायः तव सखिभूताः । अथवा त्वां यन्तः सखायो वयं कण्वाः तदिदर्थाः तदेकप्रयोजनाः । जरन्त इत्यभिधानात् स्तुत्येकप्रयोजनत्वं गम्यते । अथ परोक्षवद् आह— कण्वाः कण्वगोत्रोत्पन्ना महर्षयः । [1]कणतिः शब्दार्थः[1] । 'अशूप्रुषि' (पाउ १,१५१) इत्यादिना कन्प्रत्ययः । नित्त्वाद् आद्युदात्तः । 'गर्गादिभ्यो यञ्' (पा ४,१,१०५) इति यञ् । तस्य बहुषु लुक् । स एव स्वरः । उक्थेभिः उक्थैः । उच्यन्त इत्युक्थानि स्तोत्राणि । तैः जरन्ते स्तुवन्ति । जरतिर्नैरुक्तो (तु. निघ ३,१४) धातुः स्तुत्यर्थे वर्तते ।

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥ २ ॥

न । घ । ईम् । अन्यत् । आ । पपन । वज्रिन् । अपसः । नविष्टौ । तव । इत् । ऊं इति । स्तोमम् । चिकेत ॥ २ ॥

हे वज्रिन् वज्रवन्निन्द्र अपसः कर्मणो यागात्मनो नविष्टौ नवनस्य [2]स्तुतेरेषणायां सत्यां नवायाम् इष्टौ वा नूतने यागे कर्तव्ये सति । शकन्ध्वादित्वात् पररूपत्वम् । ईम् इदानीम् अन्यत् त्वद्विषयाद् अपरम् अन्यदेवताविषयं स्तोत्रं न घ नैव आ पपन अभिष्टौमि । पनतेः स्तुतिकर्मणः उत्तमे णलि रूपम् । किं तु तवेदु तवैव स्तोमम् स्तोत्रं चिकेत जानामि ।

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति । यन्ति प्रमादमतन्द्राः ॥ ३ ॥

इच्छन्ति । देवाः । सुन्वन्तम् । न । स्वप्नाय । स्पृहयन्ति । यन्ति । प्रऽमादम् । अतन्द्राः ॥

देवाः इन्द्राद्याः सुन्वन्तम् सोमाभिषवं कुर्वन्तं यजमानम् इच्छन्ति रक्षितुम् इच्छां कुर्वन्ति । स्वप्नाय । स्वप्नशब्देन अनादरो लक्ष्यते । तद्विषयानादराय न स्पृहयन्ति नेच्छन्ति । औदासीन्यं[3] न कुर्वन्तीत्यर्थः । 'स्पृहेरीप्सितः' (पा १,४,३६) इति कर्मणि चतुर्थी । किं तु प्रमादम् प्रकर्षेण मादयितारं तं तस्य मदकरं सोमं वा उद्दिश्य अतन्द्राः अनलसाः सन्तो यन्ति गच्छन्त्येव । स्पृहयन्तीति । स्पृह ईप्सायाम् । चुरादिरदन्तः ।

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्व१स्य नो वसो ॥४॥

---

१. कणश° S′.　　२. स्तुरेष° S′.　　३. उदासीनं S′.

कल्पः । जयतेस्तु टिलोपो निपातनात् । द्युम्नेषु द्योतमानेषु धनेषु प्राप्तव्येषु पृत्सुतूर्षु पृतनासु तर्तव्यासु च (?) । पृतनाशब्दस्य सौ परतो 'मांसपृतस्नूनाम् उपसंख्यानम्' (पावा ६,१,६२) इति पृदादेशः । ञित्वरा संभ्रमे इति संपदादिलक्षणः क्विप् । 'ज्वरत्वर' (पा ६,४,२०) इत्यादिना ऊठ् । 'तत्पुरुषे कृति बहुलम्' (पा ६,३,१४) इति सप्तम्या अलुक् । कृदुत्तरपदप्रकृतिस्वरः । तथा श्रवःसु च । अन्ननामैतत् । 'श्रव इत्यन्ननाम । श्रूयत इति सतः' इति निरुक्तम् (१०, ३) । अन्नेषु च लब्धव्येषु एवम् अभिमातिषु शत्रुषु पापेषु वा । हन्तव्येष्विति शेषः । एतेषु फलेषु निमित्तभूतेषु साक्ष्व अस्मान् सचस्व अनुसर । षच समवाये[1] । लोटि 'बहुलं छन्दसि' (पा २,४,७३) इति शपो लुक् । कुत्वषत्वे । दीर्घश्छान्दसः ।

इति तृतीयेऽनुवाके द्वितीयं सूक्तम् ।

'शुष्मिन्तमं न ऊतये' इति सूक्तस्य अतिरात्रे ब्राह्मणाच्छंसिनः प्रथमपर्यायशस्त्रे विनियोग उक्तः ।

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् । इन्द्र सोमं शतक्रतो ॥ १ ॥

शुष्मिन्ऽतमम् । नः । ऊतये । द्युम्निनम् । पाहि । जागृविम् । इन्द्र । सोमम् । शतक्रतो इति शतऽक्रतो ॥ १ ॥

हे शतक्रतो बहुकर्मेन्द्र नः अस्माकं संबन्धिनं[2] शुष्मिन्तमम् अतिशयेन बलवन्तम् । 'नाद् घस्य' (पा ८,२,१७) इति नुडागमः । द्युम्निनम् द्योतनवन्तं जागृविम् जागरणशीलं स्वप्ननिवारकम् । न हि सोमं पीतवतः स्वप्नप्रसङ्गोऽस्ति, अस्वप्नत्वसाधनत्वात् तस्य । उक्तमहिमोपेतं सोमम् ऊतये अस्माकं रक्षणाय पाहि पिब ।

इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु । इन्द्र तानि त आ वृणे ॥ २ ॥

इन्द्रियाणि । शतक्रतो इति शतऽक्रतो । या । ते । जनेषु । पञ्चऽसु । इन्द्र । तानि । ते । आ । वृणे ॥

हे शतक्रतो हे इन्द्र ते तव संबन्धीनि यानि प्रसिद्धानि इन्द्रियाणि इन्द्रसृष्टानि इन्द्रदत्तानि वा वीर्याणि दर्शनश्रवणादिलक्षणानि पञ्चसु जनेषु देवमनुष्यपित्रसुररक्षःसु निषादपञ्चमेषु चतुर्षु वर्णेषु वा विद्यन्ते ते तव स्वभूतानि तानि आ वृणे संभजेय । वृङ् संभक्तौ इत्यस्य लटि रूपम् ।

अगन्निन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम् । उत् ते शुष्मं तिरामसि ॥ ३ ॥

अगन् । इन्द्र । श्रवः । बृहत् । द्युम्नम् । दधिष्व । दुस्तरम् । उत् । ते । शुष्मम् । तिरामसि ॥

---

१. षह अभिभवे शंपा. २. संबन्धि S'.

हे इन्द्र तव संबन्धि बृहत् महत् प्रभूतं श्रवः अन्नम् अगन् अस्मान् गच्छतु। यद्वा उक्तरूपं सोमलक्षणम् अन्नं त्वाम् अगन् प्राप्नोतु । गमेर्लङि 'बहुलं छन्दसि' (पा २,४,७३) इति शपो लुक्। 'हल्ङ्या' (पा ६,१,६८) इत्यादिना तिलोपः। 'मो नो धातोः' (पा ८,२,६४) इति मकारस्य नकारः । अडागमस्वरः। त्वं च दुस्तरम् शत्रुभिस्तरीतुम् अयोग्यं द्युम्नम् द्योतमानं यशो द्रविणं वा दधिष्व अस्मासु स्थापय। वयं तु ते शुष्मम् बलम् उत् तिरामसि सोमेन स्तोत्रेण च वर्धयामः। तॄ प्लवनतरणयोः । लटि व्यत्ययेन शः। 'ॠत इद्धातोः' (पा ७,१,१००) इति इत्वम्। 'इदन्तो मसि' (पा ७,१,४६)।

अर्वावतो न आ गह्यथो शक्र परावतः ।
उ लोको यस्ते अद्रिव इन्द्रेह तत आ गहि ॥ ४ ॥

अर्वाऽवतः । नः । आ । गहि । अथो इति । शक्र । पराऽवतः ।
ऊं इति । लोकः । यः । ते । अद्रिऽवः । इन्द्र । इह । ततः । आ । गहि ॥ ४ ॥

हे शक्र बलवन्निन्द्र अर्वावतः अर्वाचीनात् समीपाद् देशाद् अथो अपि च परावतः अतिदूराद् देशात्। 'उपसर्गाच्छन्दसि धात्वर्थे' (पा ५,१,११८) इति वतिः। प्रत्ययस्वरः। नः अस्मान् अभिलक्ष्य आ गहि आगच्छ। उ इति वाक्यालंकारे। अद्रिवः। अत्ति भक्षयति शत्रून् इति अद्रिर्वज्रः । आदृणातीति वा । तद्वन् ते तव यो लोकः उत्तमो लोकोऽस्ति हे इन्द्र ततः तस्मादपि लोकाद् इह अस्मिन् देवयजने देशे सोमपानार्थम् आ गहि आगच्छ। गम्लृ सृप्लृ गतौ । 'बहुलं छन्दसि' (पा २, ४,७३) इति शपो लुक् । सेर्हिरादेशः । हेरपित्त्वाद् ङिद्वद्भावेन 'अनुदात्तोपदेश' (पा ६,४,३७) इत्यादिना अनुनासिकलोपः।

इन्द्रो अङ्ग महद् भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः ॥५॥

इन्द्रः। अङ्ग। महत्। भयम्। अभि। सत्। अप। चुच्यवत्। सः। हि। स्थिरः। विऽचर्षणिः ॥

अङ्ग इति आत्मानम् ऋत्विजं वा अभिमुखीकृत्य ब्रूते। इन्द्रो देवः अस्माकम् उत्पन्नं महत् प्रभूतम् अन्यैः परिहर्तुम् अशक्यं भयम् अभी षत् अभिभवति परिहरति[1]। अभिपूर्वात् सदेर्लङ्[2]। बहुलवचनाद् अडभावः शपो लुक् च। इतश्च लोपः। हल्ङ्यादिलोपः। 'सदिरप्रतेः' (पा ८,३,६६) इति षत्वम्। 'निपातस्य च' (पा ६,३,१३६) इति दीर्घः। किं भयस्य अभिभवमात्रम्, नेत्याह — अप चुच्यवद् इति। भयम् अपच्यावयति अस्मत्तः पृथक्कृत्य दूरतोऽपसारयति। ईदृशः सामर्थ्यस्य संभावनाम् आह — स हि स खल्विन्द्रः स्थिरः स्वयम् अन्येन न च्याव्यः

---

१. परिहरिष्यति S'. २. अस्तेः शतृप्रत्ययः इति न्याय्यम् (द्र. स्वरः, सा. [ऋ २,४१,१०] च).

विचर्षणिः विश्वस्य द्रष्टा । भयकृतः प्रच्छन्नान् प्रकाशांश्च रक्षणीयान् अस्मांश्च जानातीत्यर्थः । अप चुच्यवद् इति । च्युङ् प्लुङ् गतौ इत्यस्मात् लुङि णिलोपे उपधाह्रस्वत्वे 'स्रवतिशृणोति' ( पा ७,४,८१ ) इत्यादिना अभ्यासस्य विकल्पेन इत्त्वम् । 'बहुलं छन्दसि°' ( पा ६,४,७५ ) इति अडभावः ।

इन्द्रश्च मृळयाति[1] नो न नः पश्चादघं नशत् । भद्रं भवाति नः पुरः ॥ ६॥

इन्द्रः । च । मृळयाति । नः । न । नः । पश्चात् । अघम् । नशत् । भद्रम् । भवाति । नः । पुरः ॥ ६ ॥

इन्द्रश्च । चशब्दश्चेदर्थे । अस्माभिः शरणं गन्तव्यो देवः इन्द्रश्चेत् परमैश्वर्यगुणविशिष्टः सर्वभूतस्य रक्षकश्चेद् नः अस्मान् मृळयाति सुखयतु । मृडयतेर्लेटि आटि कृते रूपम् । स तादृशश्चेत् पश्चात् पृष्ठतो नः अस्मान् अघम् दुःखं न नशत् न प्राप्नोतु । नशेर्लेट् । किं च नः अस्माकं पुरः पुरस्ताद् भद्रम् मङ्गलं च भवाति भवतु । भवतेर्लेट् ।

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून् विचर्षणिः ॥ ७ ॥

इन्द्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयम् । करत् । जेता । शत्रून् । विऽचर्षणिः ॥ ७ ॥

स इन्द्रः सर्वाभ्य आशाभ्यस्परि । परीति पञ्चमीद्योतकः । दिग्भ्यो विदिग्भ्यः उपर्यधोदिग्भ्यां च अस्माकम् अभयम् भयराहित्यं क्षेमं करत् करोतु । सकलदिग्गतभयपरिहारसामर्थ्यं तस्य संभावयति । स इन्द्रः शत्रून् जेता सर्वास्वपि दिक्षु अस्माकं ये भयकारिणः शत्रवः सन्ति तेषां सर्वेषाम् अभिभविता विचर्षणिः तेषां विद्रष्टा च ।

इति तृतीयेऽनुवाके तृतीयं सूक्तम् ।

'न्यूषु वाचम्' इति सूक्तस्य ब्राह्मणाच्छंसिनः प्रथमपर्यायशस्त्रे विनियोग उक्तः । अत्र 'य उद्दचि' इत्येषा अन्तिमा परिधानीया ।

न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः ।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते ॥ १ ॥

नि । ऊं इति । सु । वाचम् । प्र । महे । भरामहे । गिरः । इन्द्राय । सदने । विवस्वतः ।
नु । चित् । हि । रत्नम् । ससताम्ऽइव । अविदत्[2] । न[3] । दुःऽस्तुतिः । द्रविणःऽदेषु । शस्यते ॥

---

१. मृडयाति B,Bh,C,R,Cs; मृळयाति K,Km,V,Dc, ऋ २,४१,११. २. अविंदत् P; अविंदन् J. ३. नः P.

महे महते । महच्छब्दस्य 'अच्छब्दलोपश्छान्दसः[1] । इन्द्राय देवाय सु वाचम् शोभनां स्तुतिं नि प्र भरामहे नितरां प्रयुञ्ज्महे[2] । उ इति पदपूरणः । न्यूष्विति । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (पा ८,२,४) इति स्वरितत्वम् । तच्च उदात्तपरत्वात् संहितायां कम्पते । 'इकः सुञि' (पा ६,३,१३४) इति दीर्घत्वम् । 'सुञः' (पा ८,३,१०७) इति षत्वम् । यतो विवस्वतः परिचरतो यजमानस्य सदने यज्ञगृहे इन्द्राय गिरः स्तुतयः क्रियन्ते । हि यस्मात् स इन्द्रः नू चित् क्षिप्रमेव रत्नम् रमणीयम् असुराणां धनम् अविदत् विन्दति । तत्र दृष्टान्तः — ससतामिव यथा ससताम् स्वपतां पुरुषाणां धनं चोरः क्षिप्रं लभते तद्वत् । अतोऽस्मभ्यं धनं दातुं शक्त इति भावः । द्रविणोदेषु धनस्य दातृषु पुरुषेषु दुष्टुतिः असमीचीना स्तुतिः न शस्यते नाभिधीयते न युज्यते वा । अतः सुवाचं प्र भरामहे इति पूर्वेण संबन्धः ।

दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥ २ ॥

दुरः । अश्वस्य । दुरः । इन्द्र । गोः । असि । दुरः । यवस्य । वसुनः । इनः । पतिः ।
शिक्षाऽनरः । प्रऽदिवः । अकामऽकर्शनः । सखा । सखिऽभ्यः । तम् । इदम् । गृणीमसि ॥

हे इन्द्र त्वम् अश्वस्य । जातावेकवचनम् । अश्वानाम् एतद् गजादीनामपि उपलक्षणम् । अश्वगजादिवाहनानां दुरः दाता असि । डुदाञ् दाने । 'मन्दिवाशि' (पाउ १,३८) इत्यादिना विधीयमान उरच्प्रत्ययो बहुलवचनाद् अस्मादपि भवति । अत एव आकारलोपः । तथा गोः । एतद् उपलक्षणं महिष्यादेः । गोमहिष्यादीनां दुरोऽसि । तथा यवस्य । एतद् व्रीह्यादिधान्यजातस्य उपलक्षणम् । तस्य दुरः असि । एवं वसुनः धनस्य हिरण्यमणिमुक्तादिरूपस्य इनः स्वामी पतिः पालकश्चासि । शिक्षानरः । शिक्षतिर्दानकर्मा । शिक्षाया दानस्य नेताऽसि । यद्वा शिक्षाविषयभूता नरा मनुष्या यस्य[3] स शिक्षानरः प्रदिवः प्रगता दिवो दिवसा यस्य[3] स तथोक्तः । पुराण इत्यर्थः । अकामकर्शनः कामानां कर्शनः कामकर्शनः स न भवतीत्यकामकर्शनः । स्वसेविनां कामवर्धक इत्यर्थः । एवं सखिभ्यः समानख्यानेभ्यः सखिभूतेभ्य ऋत्विग्भ्यः सखा मित्रभूतः एवंमहिमा य इन्द्रोऽस्ति तं तादृशम् इन्द्रम् इदं स्तोत्रं गृणीमसि गृणीमः उच्चारयामः कुर्मः । गॄ शब्दे । क्रैयादिकः । 'प्वादीनां ह्रस्वः' (पा ७,३,८०) इति ह्रस्वत्वम् । 'इदन्तो मसि' (पा ७,१,४६) इति मस इकारः ।

---

१. अच्छब्द नास्ति S'. २. प्रयुक्ष्महे S'. ३. बहुव्रीहौ स्वरः ?

शचीव इन्द्र पुरुकृद् द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः काममूनयीः ॥ ३ ॥

शचीऽवः । इन्द्र । पुरुऽकृत् । द्युमत्ऽतम । तव । इत् । इदम् । अभितः । चेकिते । वसु ।
अतः । सम्ऽगृभ्य । अभिऽभूते । आ । भर । मा । त्वाऽयतः । जरितुः । कामम् । ऊनयीः ॥

हे शचीवः । शची इति प्रज्ञानाम । प्रज्ञावन्निन्द्र । 'मतुवसो रु संबुद्धौ छन्दसि' (पा ८,३,१) इति रुत्वम् । षाष्ठिकम् आमन्त्रिताद्युदात्तत्वम् । हे इन्द्र परमैश्वर्यगुणविशिष्ट पुरुकृत् बहूनां कर्तः द्युमत्तम दीप्तिमत्तम । एषाम् इन्द्रादीनाम् आष्टमिकं सर्वानुदात्तत्वम् । न च 'आमन्त्रितं पूर्वम् अविद्यमानवत्' (पा ८,१,७२) इत्यविद्यमानवत्त्वम्, 'नामन्त्रिते समानाधिकरणे°' (पा ८,१,७३) इति निषेधात् । एवंमहानुभाव इन्द्र अभितः सर्वत्र यद् वसु धनं विद्यते तद् इदं सर्वं तवेत् तवैव स्वम् । धनजातस्य सर्वस्यापि त्वमेव स्वामीत्यर्थः । इत्थं चेकिते भृशम् अस्माभिर्ज्ञायते । कित ज्ञाने । अस्माद् यङन्ताद् वर्तमाने लिटि 'कास्प्रत्ययादाममन्त्रे लिटि' (पा ३,१,३५) इति निषेधाद् आम्प्रत्ययाभावे सति लिट आर्धधातुकत्वाद् अतोलोपयलोपौ । हे अभिभूते शत्रूणाम् अभिभवितरिन्द्र अतः अस्मात् कारणात् संगृभ्य सर्वं धनं संगृह्य आ भर आहर अस्मभ्यं प्रयच्छ । त्वायतः त्वाम् आत्मन इच्छतो जरितुः स्तोतुर्मम कामं मोनयीः ऊनं मा कार्षीः । पूरयेत्यर्थः । ऊन परिहाणे । लुङि 'णिश्रिद्रुस्रुभ्यः°' (पा ३,१,४८) इति च्लेश्चङादेशस्य[1] 'नोनयतिध्वनयति' (पा ३,१,५१) इत्यादिना प्रतिषेधे 'ह्मयन्तक्षण°' (पा ७,२,५) इति सिचिवृद्धिप्रतिषेधः ।

एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥ ४ ॥

एभिः । द्युऽभिः । सुऽमनाः । एभिः । इन्दुऽभिः । निऽरुन्धानः । अमतिम् । गोभिः ।
अश्विना । इन्द्रेण । दस्युम् । दरयन्तः । इन्दुऽभिः । युतऽद्वेषसः । सम् । इषा । रभेमहि ॥४॥

हे इन्द्र एभिः अस्माभिर्दत्तैः द्युभिः दीप्तैश्चरुपुरोडाशादिभिः एवम् एभिः अस्माभिर्दत्तैः इन्दुभिः सोमैश्च प्रीतस्त्वम् अस्माकम् अमतिम् [2]दारिद्र्यम् गोभिः बह्वीभिः[2] अश्विना अश्ववता धनेन च निरुन्धानः निवर्तयन् सुमनाः शोभनमनाः । भवेति शेषः । वयम् इन्दुभिः अस्माभिर्दत्तैः सोमैः प्रीतेन इन्द्रेण दस्युम् उपक्षपयितारं शत्रुं दरयन्तः दारयन्तो हिंसन्तः अत एव युतद्वेषसः । अत्र यौतिरमिश्रणार्थः । पृथग्भूतद्वेषाः अपगतशत्रवः सन्तः इषा अन्नेन इन्द्रदत्तेन सं रभेमहि संरब्धा भवेम । संगता भवेमेत्यर्थः ।

---

१. च्लेरङादे° S'.	२. दारिद्र्यमस्मदीयं गोभिर्बह्वीभिः S'.

सामिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाऽश्वावत्या रभेमहि ॥ ५ ॥

सम् । इन्द्र । राया । सम् । इषा । रभेमहि । सम् । वाजेभिः । पुरुऽचन्द्रैः । अभिद्युऽभिः ।
सम् । देव्या । प्रऽमत्या । वीरऽशुष्मया । गोऽअग्रया । अश्वऽवत्या । रभेमहि ॥ ५ ॥

हे इन्द्र राया धनेन त्वदीयेन सं रभेमहि संगच्छेमहि । तथा इषा सर्वैरिष्यमाणेन अन्नेन सं रभेमहि । तथा वाजेभिः वाजैर्बलैः सं रभेमहि । कीदृशैः । पुरुश्चन्द्रैः पुरूणां बहूनां प्रजानाम् आह्लादकैः अभिद्युभिः अभितो दीप्यमानैः । किं च देव्या देवस्य इन्द्रस्य संबन्धिन्या प्रमत्या प्रकृष्टया बुद्धया अनुग्रहरूपया सं रभेमहि । प्रमतिं विशिनष्टि — वीरशुष्मया विविधम् ईरकं निवारकं शुष्मं बलं यस्याः सा तादृश्या । गोअग्रया गावो दातव्या अग्रे यस्यां प्रमत्यां सा तथोक्ता तादृश्या । 'सर्वत्र विभाषा गोः' (पा ६,१,१२२) इति प्रकृतिभावः । अश्वावत्या अश्वैरस्मभ्यं दातव्यैस्तद्वत्या । 'मन्त्रे सोमाश्वेन्द्रिय°' (पा ६,३,१३१) इति मतुपि दीर्घत्वम् । एवंमहानुभावया प्रमत्या सं रभेमहीति संबन्धः ।

ते त्वा मदा अमदन् तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत् कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥ ६ ॥

ते । त्वा । मदाः । अमदन् । तानि । वृष्ण्या । ते । सोमासः । वृत्रऽहत्येषु । सत्ऽपते ।
यत् । कारवे । दश । वृत्राणि । अप्रति । बर्हिष्मते । नि । सहस्राणि । बर्हयः ॥ ६ ॥

हे सत्पते सतां पालक इन्द्र वृत्रहत्येषु वृत्राणां शत्रूणां हत्येषु हननेषु निमित्तभूतेषु सत्सु ते प्रसिद्धा मदाः मदकरा आज्यपुरोडाशादयो मरुतो वा त्वा त्वाम् अमदन् हर्षं प्रापयन् । तथा तानि प्रसिद्धानि वृष्ण्या वर्षकस्य तव हर्षसाधनत्वेन संबन्धीनि स्तोत्राण्यपि त्वाम् अमदन् । ते प्रसिद्धाः सोमासः सोमा अपि त्वाम् अमदन् । यत् यदा कारवे । स्तोतृनामैतत् । स्तोत्रे बर्हिष्मते यागवते यजमानाय दश सहस्राणि वृत्राणि आवरकाणि पापानि अमित्रान् वा अप्रति प्रतिरहितं यथा भवति तथा नि बर्हयः न्यवधीः । तदानीम् इति पूर्वेण संबन्धः । बर्हयतिर्हिंसाकर्मा । लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' (पा ६,४,७५) इत्यडभावः । शपः पित्त्वाद् अनुदात्तत्वे णिचः स्वरः शिष्यते । यद्वृत्तयोगाद् अनिघातः ।

युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥ ७ ॥

युधा । युधम् । उप । घ । इत् । एषि । धृष्णुऽया । पुरा । पुरम् । सम् । इदम् । हंसि । ओजसा ।
नम्या । यत् । इन्द्र । सख्या । पराऽवति । निऽबर्हयः । नमुचिम् । नाम । मायिनम् ॥ ७ ॥

हे इन्द्र त्वं युधा प्रहरणसाधनेन वज्रेण आयुधेन । अथवा योधनं युध् तेन । प्रहरणेनेत्यर्थः । संपदादिलक्षणः क्विप् । कीदृशेन । धृष्णुया धर्षकेण युधम् शत्रोरायुधं प्रहरणं वा उप घेदेषि । घेति पूरणः । उपैष्येव उपगच्छस्येव । अनेनास्य द्वन्द्वयुद्धकुशलत्वम् उक्तं भवति । एवं पुरा नगरेण । अत्र पूरशब्देन तत्रस्था भटा लक्ष्यन्ते । पुरस्थैः स्वकीयैर्योद्धृभिर्मरुत्प्रभृतिभिः इदम् इदानीं पुरम् शत्रुनगरं पुरस्थान् योद्धृन् वा ओजसा बलेन सं हंसि सम्यग् नाशयसि । यत् यस्मात् कारणात् नम्या नम्यया सर्वैः प्रह्वीभवितुम् अर्हया सख्या सखिभूतया शक्त्या आयुधेन परावति दूरदेशे नमुचिं नाम नमुचिनामधेयम् असुरं मायिनम् मायावन्तं निबर्हयः नितराम् अहिंसीः । अतस्त्वम् एवं स्तूयस इत्यर्थः ।

त्वं कर॑ञ्जमु॒त प॒र्णयं॑ वधी॒स्तेजि॑ष्ठयाऽतिथि॒ग्वस्य॑ वर्त॒नी ।
त्वं श॒ता वङ्गृ॑दस्याभिन॒त् पुरो॑ऽनानु॒दः परि॑षूता ऋ॒जिश्व॑ना ॥ ८ ॥

त्वम् । कर॑ञ्जम् । उ॒त । प॒र्णय॑म् । व॒धीः॒ । तेजि॑ष्ठया । अ॒ति॒थि॒ऽग्वस्य॑ । व॒र्तनी । त्वम् । श॒ता । वङ्गृ॑दस्य । अ॒भि॒न॒त् । पुरः॑ । अ॒न॒नु॒ऽदः । परि॑ऽसूताः । ऋ॒जिश्व॑ना ॥ ८ ॥

हे इन्द्र त्वं करञ्जम् एतन्नामानम् असुरं वधीः अवधीः हतवान् असि । हन्तेर्लुङि सिपि 'लुङि च' ( पा २,४,४३ ) इति वधादेशः[१] । तस्य अदन्तत्वाद् वृद्ध्यभावः । अत एव अनेकाच्त्वाद् इट्प्रतिषेधाभावः । 'इट ईटि' ( पा ८,२,२८ ) इति सिचो लोपः । उत[२] अपि च पर्णयम् एतत्संज्ञकम् असुरं वधीः । किमर्थम् अवधीरिति तत्राह—अतिथिग्वस्य अतिथ्यर्था गावो यस्यासौ[३] अतिथिग्वः । तस्य राज्ञः प्रयोजनाय । केन साधनेनेति उच्यते । तेजिष्ठया अतिशयेन तेजस्विन्या । तेजःशब्दाद् 'अस्मायामेधास्रजो विनिः' ( पा ५,२,१२१ ) इति मत्वर्थीयो विनिः । तस्माद् आतिशायनिक इष्ठन् । 'विन्मतोर्लुक्' ( पा ५,३,६५ ) इति विनो लुक् । 'टेः' ( पा ६,४,१४६ ) इति टिलोपः । नित्त्वाद् आद्युदात्तत्वम् । तादृश्या वर्तनी वर्तन्या शक्त्या एतन्नामकेन आयुधेन । किं च त्वम् ऋजिश्वना एतन्नामकेन राज्ञा निमित्तेन परिषूताः परितोऽवष्टब्धाः शता शतानि शतसंख्याका वङ्गृदस्य एतत्संज्ञकस्य असुरस्य पुरः पुराणि नगराणि अभिनत् नाशितवान् । कीदृशस्त्वम् । अननुदः नुदति शत्रून् अपसारयतीति नुदः न तादृशोऽनुदः अप्रेरकः[४] । तादृशो न भवतीत्यननुदः[५] । सर्वदा शत्रुच्यावक इत्यर्थः । अथवा अनु पश्चाद् द्यति खण्डयतीत्यनुदः अनुचरः । स यस्य नास्ति सोऽननुदः । असहायभूत इत्यर्थः । दो अवखण्डने । 'आदेचः०' ( पा ६,१,४५ ) इत्यात्त्वम् । 'आतश्चोपसर्गे' ( पा ३,१,१३६ ) इति कप्रत्ययः । नास्ति अनुदोऽस्य इति बहुव्रीहौ 'नञ्सुभ्याम्' ( पा ६,२,१७२ ) इति उत्तरपदान्तोदात्तत्वम् ।

---

१. यङादेशः S'.	२. एवम् उत S'.	३. बहुव्रीहौ स्वरः ?	४. सप्रेरकः S'.
५. अत्रार्थे पपा. विरुध्यते; वैप १,१६९ e अपि द्र.

हर्योरश्वयोर्योजनम् अस्मिन् रथे स तथोक्तः । तस्य स्वामित्वेन संबन्धी हारियोजनः । हे हारियोजन इन्द्र गोतमासः गोतमगोत्रोत्पन्ना महर्षयः सुवृक्ति सुष्ठु आवर्जकानि अभिमुखीकरणकुशलानि ब्रह्माणि स्तुतिरूपाणि मन्त्रजातानि ते तवैव एव एवंप्रकारेण अक्रन् अकृषत । करोतेर्लुङि 'मन्त्रे घस' (पा २,४,८०) इत्यादिना च्लेर्लुक् । अन्तादेशः । तस्य ङित्त्वाद् गुणाभावे यणादेशः । 'इतश्च' (पा ३,४,१००) इति इकारलोपे संयोगान्तलोपे च अडागमः । एषु स्तोतृषु विश्वपेशसम् बहुविधरूपयुक्तं धियम् । धिया लभ्यत्वाद् धीर्धनम् उच्यते । यद्वा धीशब्दः कर्मवचनः । पश्वादिबहुविधरूपं धनम् अग्निष्टोमादिबहुविधरूपं कर्म वा आ धाः आधेहि स्थापय । प्रातः इदानीमिव परेद्युरपि प्रातःकाले धियावसुः बुद्ध्या कर्मणा वा प्राप्तधन इन्द्रो मक्षु शीघ्रं जगम्यात् अस्मद्रक्षणार्थम् आगच्छतु ।

इति चतुर्थेऽनुवाके द्वितीयं सूक्तम् ।

आभिप्लविके युग्माहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे 'य एक इद्धव्यः' इति सूक्तं संपातसंज्ञया विनियुक्तम् । सूत्रितं हि "[1]युग्मेषु 'इन्द्रः[1] पूर्भिदातिरद्दासमर्कैः' (अ २०,११), 'य एक इद्धव्यश्चर्षणीनाम्' (अ २०,३६), 'यस्तिग्मशृङ्गो वृषभो न भीमः' (अ २०,३७) इति संपातानाम् एकैकम् अहरहरावपते पृष्ठ्ये छन्दोमेषु दशमे च" (वैताश्रौ ३१,२४;२५) इति ।

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्चि आभिः ।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥ १ ॥

यः । एकः । इत् । हव्यः । चर्षणीनाम् । इन्द्रम् । तम् । गीःऽभिः । अभि । अर्चे । आभिः ।
यः । पत्यते । वृषभः । वृष्ण्यऽवान् । सत्यः । सत्वा । पुरुऽमायः । सहस्वान् ॥ १ ॥

चर्षणीनाम् । मनुष्यनामैतत् । मनुष्याणां यजमानानां यः इन्द्रः एक इत् एक एव हव्यः प्राधान्येन यज्ञे ह्वातव्यः । यद्वा जयकामानां राजादीनां स्वसहायत्वेन एक एव हव्यः । तं ह्वातव्यम् इन्द्रम् आभिः क्रियमाणप्रकाराभिः गीर्भिः स्तुतिवाग्भिः अभि अर्चे । अर्चतिः स्तुतिकर्मा । अभिष्टौमि । किं च यो वक्ष्यमाणगुणविशिष्ट इन्द्रः पत्यते सर्वस्येश्वरो भवति । इन्द्रं विशिनष्टि — वृषभः कामानां वर्षिता वृष्ण्यावान् । वृष्ण्यं [2]वर्षणयोग्यं बलम्[2] तद् अस्यास्तीति वृष्ण्यवान् । 'मादुपधायाः°' (पा ८,२,९) इति मतुपो वत्वम् । 'अन्येषामपि दृश्यते' (पा ६,३,१३७) इति दीर्घः । मतुपः पित्त्वाद् अनुदात्तत्वे 'यतोऽनावः' (पा ६,१,२१३) इत्याद्युदात्तत्वम् । सत्यः सत्यफलः सत्वा [3]बलस्य सादयिता[3] पुरुमायः बहुकर्मा सहस्वान् बलवान् एवम् उक्तगुणोपेतो य इन्द्रः पत्यते । तं गीर्भिरभ्यर्चे इति संबन्धः ।

---

१. युग्मेष्विन्द्रः S'. २. °योग्यबलम् S'. ३. बलयिता S'.

